NOTES ON VIṢṆUSAHASRANĀMA

Page 16

ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रियः ।

ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणा ॥

aiśvaryasya samagrasya vīryasya yaśasaḥ śriyaḥ |
jñānavairāgyayoścaiva ṣaṇṇāṁ bhaga itīraṇā || Vi. Pu. 6.5.74

Page 20-21

सच्चिदानन्दरूपाय कृष्णायाक्लिष्टकारिणे ।

नमो वेदन्तवेद्याय गुरवे बुद्धिसाक्षिणे ॥

saccidānandarūpāya kṛṣṇāyākliṣṭakāriṇe |
namo vedantavedyāya gurave buddhisākṣiṇe ||

कृष्णद्वैपायनं व्यासं सर्वलोकहिते रतम् ।

वेदाब्जभास्करं वन्दे शमादिनिलयं मुनिम् ॥

kṛṣṇadvaipāyanaṁ vyāsaṁ sarvalokahite ratam |
vedābjabhāskaraṁ vande śamādinilayaṁ munim ||

सहस्रमूर्तेः पुरुषोत्तमस्य सहस्रनेत्राननपादबाहोः ।

सहस्रनाम्नां स्तवनं प्रशस्तं निरुच्यते जन्मजरादिशान्त्यै ॥

sahasramūrteḥ puruṣottamasya sahasranetrānanapādabāhoḥ |

sahasranāmnāṁ stavanaṁ praśastaṁ nirucyate janmajarādiśāntyai ||
Page 23-25

1. विघ्नराजा vighnarājā
2. विघ्नहरः vighnaharaḥ
3. दृष्ट अदृष्ट dṛṣṭa adṛṣṭa
4. दृष्ट-फल अदृष्ट-फल dṛṣṭa-phala adṛṣṭa-phala
5. धर्म अदृष्ट-फल पुण्य सुख dharma adṛṣṭa phala puṇya sukha
6. अधर्म अदृष्टफल पाप दुःख adharma adṛṣṭaphala pāpa duḥkha
7. ईश्वर कर्माध्यक्ष कर्मफलदाता īśvara karmādhyakṣa karmaphaladātā
8. प्रारब्ध कर्म prārabdha karma
9. संचित कर्म sañcita karma
10. आगामी कर्म āgāmī karma
11. पुण्य puṇya पाप pāpa

Page 28

12. धर्मः वैदिककर्म dharmaḥ vaidikakarma
13. कर्मन् karman
14. विधिः निषेधः प्रायश्चित्त vidhiḥ niṣedhaḥ prāyaścitta
15. पावनानि pāvanāni
16. साधन सकल-पुरुषार्थ-साधन sādhana sakala-puruṣārtha-sādhanana
17. अलप-प्रयास alpa-prayāsa
18. अनल्प-फल भूम-फल analpa-phala bhūma-phala

Page 29

19. लोक्यते अनेन lokyate anena *from* लोक् 1a . lok

20. विद्या-स्थान n. vidyā-sthāna

21. शास्त्र n. śāstra

22. अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः।

पुराणं धर्मशास्त्रं च विद्या ह्येताश्चतुर्दश ॥

aṅgāni vedāścatvāro mīmāṁsā nyāyavistaraḥ |
purāṇaṁ dharmaśāstraṁ ca vidyā hyetāścaturdaśa ||

23. वेदाङ्गानि शिक्षा व्याकरणम् निरुक्तम् चन्दस् ज्योतिषम् कल्पः

उपाङ्गानि मिमांसा न्यायः पुराणम् धर्मशास्त्रम्

Vedāṅgāni : śikṣā, vyākaraṇam, niruktam, candas, jyotiṣam kalpaḥ,
upāṅgāni : mimāṁsā nyāyaḥ purāṇam dharmaśāstram

24. परायणम् परम् अयनम् param ayanam parāyaṇam

भिद्यते हृदय-ग्रन्थिः bhidyate hṛdaya-granthiḥ

छिद्यन्ते सर्व-संशयाः chidyante sarva-saṁśayāḥ

क्षीयन्ते च अस्य कर्माणि मु।२।२।९ kṣīyante ca asya karmāṇi mu|2|2|9

ब्रह्म वेद ब्रह्मैव भवति मु। ३।२।९ brahma veda brahmaiva bhavati

Verse 8

25. जप japa उच्च ucca उपांशु upāṁśu मानस mānasa

Verse 9

26. निमित्तकारणम् nimittakāraṇam

27. उपादानकारणम् upādānakāraṇam

28. मायाशक्तिः māyāśaktiḥ

29. आलम्बनम् ālambanam

30. अधिष्ठान-देवता adhiṣṭhāna-devatā

31. क्षराक्षराभ्यां कार्यकारणाभ्याम् उत्कृष्टः kṣara-akṣarābhyāṁ kārya-kāraṇābhyām utkṛṣṭaḥ

32. अक्षरपुरुषः akṣarapuruṣaḥ

Verse 10

33. पुरि शयनात् पूर्णत्वात् पुरुषः puri śayanāt, pūrṇatvāt puruṣaḥ

34. अन्तर्यामी परात्मा antaryāmī parātmā

35. अव्यय विनाश-विक्रिया-रहित avyaya vināśa-vikriyā-rahita

36. कर्ता कर्म kartā karma

37. कायिकं कर्म kāyikaṁ karma

38. वाचिकं कर्म vācikaṁ karma

39. मानसं कर्म mānasaṁ karma

40. यजमानः yajamānaḥ

41. अभिषेकः abhiṣekaḥ

42. दक्षिणा dakṣiṇā

43. नमस्कारः उपचारः namaskāraḥ upacāraḥ

44. उरसा शिरसा चैव मनसा वपुषा गिरा ।

पद्भ्यां जानुभ्यां कराभ्यां नमस्कारो अष्टाङ्ग उच्यते ॥

urasā śirasā caiva manasā vapuṣā girā |
padbhyāṁ jānubhyāṁ karābhyāṁ namaskāro aṣṭāṅga ucyate ||

Verse 11

45. अनादिकारणम् anādikāraṇam

46. सर्वकारणम् sarvakāraṇam

47. षड्भावविकाराः ṣaḍ-bhāva-vikārāḥ

जायते अस्ति वर्धते विपरिणमते अपक्षीयते विनश्यति

jāyate asti vardhate vipariṇamate apakṣīyate vinaśyati

48. लोक्यते इति लोकः lokyate iti lokaḥ

49. लोक-अध्यक्षः loka-adhyakṣaḥ

50. चैतन्यम् caitanyam

51. सर्व-दुःख-अतिगः sarva duḥkha atigaḥ

52. आध्यात्मिक ādhyātmika

53. आधिभौतिक ādhibhautika

54. आधिदैविक ādhidaivika

55. जपः अर्चनम् स्तुतिः japaḥ, arcanam, stutiḥ

Verse 12

56. ब्रह्मण्यम् brahmaṇyam

ब्रह्मणे हितम् brahmaṇe hitam

श्रुतये हितम् śrutaye hitam

स्वर्गकामः यजेत svargakāmaḥ yajeta

पुत्रकामः यजेत putrakāmaḥ yajeta

कर्मफलदाता karmaphaladātā

ब्रह्मणाय हितम् brahmaṇāya hitam

तपसे हितम् tapase hitam

57. सर्वान् धर्मान् जानाति इति सर्वधर्मज्ञः sarvān dharmān jānāti iti sarvadharmajñaḥ

58. लोकनाथः lokanāthaḥ

लोकैः नाथ्यते याचते lokaiḥ nāthyate- yācate

लोकानामीष्टे lokānāmīṣṭe

Verse 13

59. स्तवैः गुणसङ्कीर्तनलक्षणैः stavaiḥ guṇa-saṅkīrtana-lakṣaṇaiḥ

60. स्तुतिः स्तवः संकीर्तनम् stutiḥ stavaḥ saṅkīrtanam

61. हृदयपुण्डरीके प्रकाशमानः पुण्डरीकाक्षः hṛdaya-puṇḍarīke prakāśamānaḥ puṇḍarīkākṣaḥ

Verse 14

62. महत्तेजस् स्वप्रकाशः आत्मा परम्ब्रह्म चैतन्यलक्षण सर्वावभासक

mahat-tejas svaprakāśaḥ ātmā param brahma caitanya-lakṣaṇa sarva-avabhāsaka

63. येन सूर्यः तपति तेजसा इद्धः yena sūryaḥ tapati tejasā iddhaḥ

64. ज्योतिषां ज्योतिः jyotiṣāṁ jyotiḥ

65. न तत्र सूर्यो भाति न चन्द्रतारकं

नेमा विद्युतो भान्ति कुतोऽयमग्निः ।

तमेव भान्तमनुभाति सर्वं

तस्य भासा सर्वमिदं विभाति ॥ मु २।२।१० ॥

na tatra sūryo bhāti na candratārakaṁ
    nemā vidyuto bhānti kuto'yamagniḥ ।
tameva bhāntamanubhāti sarvaṁ
    tasya bhāsā sarvamidaṁ vibhāti ।। mu 2।2।10

66. यदादित्यगतं तेजो जगद्भासयतेऽखिलम्।

यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम्॥ BG १५।१२॥

yadādityagataṁ tejo jagadbhāsayate'khilam।
yaccandramasi yaccāgnau tattejo viddhi māmakam ।। BG 15।12

67. तपति आज्ञापयति तपः  तपति इष्टे इति वा तपःtapati ājñāpayati tapaḥ tapati iṣṭe iti vā tapaḥ

68. अन्तर्यामी ईश्वरः चेतनात्मा मायया यमयति antaryāmī īśvaraḥ cetanātmā māyayā yamayati

69. य इमं च लोकं परं च लोकं सर्वाणि च भूतानि योऽन्तरो यमयति  बृ ३।७।१

ya imaṁ ca lokaṁ paraṁ ca lokaṁ sarvāṇi ca bhūtāni yo'ntaro yamayati  bṛ 3।7।1

70. भी̱षाऽस्मा̱द्वात̍ः पवते। भी̱षोदे̍ति̱ सूर्य̍ः। भीषाऽस्मादग्नि̍श्चेन्द्र̱श्च। मृत्युर्धावति पञ्च̍म इ̱ति।

bhi̱ṣā'smā̱dvāta̍ḥ pavate । bhi̱ṣode̍ti̱ sūrya̍ḥ ।
bhīṣā'smādagni̍ścendra̱śca । mṛtyurdhāvati pañca̍ma i̱ti ।

71. परायणम्  पुनरावृत्तिशङ्कारहितम्    parāyaṇam  punar-āvṛtti-śaṅkā-rahitam

Verse 15

72. रूपमारोग्यमर्थांश्च भोगांश्चैवानुषङ्गिकान्।

ददाति ध्यायतो नित्यमपवर्गप्रदो हरिः॥

rūpamārogyamarthāṁśca bhogāṁścaivānuṣaṅgikān
dadāti dhyāyato nityamapavargaprado hariḥ ||

73. चिन्त्यमानः समस्तानां क्लेशानां हानिदो हि यः।

समुत्सृज्याखिलं चिन्त्यं सोऽच्युतः किं न चिन्त्यते॥

cintyamānaḥ samastānāṁ kleśānāṁ hānido hi yaḥ |
samutsṛjyākhilaṁ cintyaṁ so'cyutaḥ kiṁ na cintyate ||

74. अतिपातकयुक्तोऽपि ध्यायन्निमिषमच्युतम्।

भूयस्तपस्वी भवति पङ्क्तिपावनपावनः॥

atipātakayukto'pi dhyāyannimiṣamacyutam |
bhūyastapasvī bhavati paṅktipāvanapāvanaḥ ||

75. आलोड्य सर्वशास्त्राणि विचार्य च पुनः पुनः।

इदमेकं सुनिष्पन्नं ध्येयो नारायणः सदा॥

āloḍya sarvaśāstrāṇi vicārya ca punaḥ punaḥ |
idamekaṁ suniṣpannaṁ dhyeyo nārāyaṇaḥ sadā ||
MB.Anu.186.11

76. हरिरेकः सदा ध्येयो भवद्भिः सत्त्वसंस्थिकैः।

ओमित्येवं सदा विप्राः पठत ध्यात केशवम्॥

harirekaḥ sadā dhyeyo bhavadbhiḥ sattvasaṁsthikaiḥ |
omityevaṁ sadā viprāḥ paṭhata dhyāta keśavam || Harivaṁśa 3.89.9

77. ध्यायन् कृते यजन् यज्ञैस्त्रेतायां द्वापरेऽर्चयन्।

यदाप्नोति तदाप्नोति कलौ सङ्कीर्त्य केशवम्॥ वि। पु। ६।२।१७

dhyāyan kṛte yajan yajñaistretāyāṁ dvāpare'rcayan |
yadāpnooti tadāpnoti kalau saṅkīrtya keśavam || Vi. Pu. 6.2.17

78. हरिर्हरति पापानि दुष्टचित्तैरपि स्मृतः।

अनिच्छयापि संस्पृष्टो दहत्येव हि पावकः॥ बृहन्नारायणपुराण ११।९९

harirharati pāpāni duṣṭacittairapi smṛtaḥ |
anicchayāpi saṁspṛṣṭo dahatyeva hi pāvakaḥ ||
bṛhannārāyaṇapurāṇa 11|99

79. ज्ञानतोऽज्ञानतो वापि वासुदेवस्य कीर्तनात्।

तत् सर्वं विलयं याति तोयस्थं लवणं यथा॥

jñānato'jñānato vāpi vāsudevasya kīrtanāt |
tat sarvaṁ vilayaṁ yāti toyasthaṁ lavaṇaṁ yathā ||

80. हरेर्नामैव नामैव नामैव मम जीवनं।

कलौ नास्त्येव नास्त्येव नास्त्येव गतिरन्यथा॥

harernāmaiva nāmaiva nāmaiva mama jīvanaṁ |
kalau nāstyeva nāstyeva nāstyeva gatiranyathā ||

81. सर्वदा सर्वकार्येषु नास्ति तेषाममङ्गलम्।

येषां हृदिस्थो भगवान् मङ्गलायतनो हरिः॥

sarvadā sarvakāryeṣu nāasti teṣāmamaṅgalam |
yeṣāṁ hṛdistho bhagavān maṅgalāyatano hariḥ ||

82. एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा ।

कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च ॥ श्वे उप ६ ।११

eko devaḥ sarvabhūteṣu gūḍhaḥ sarvavyāpī sarvabhūtāntarātmā |
karmādhyakṣaḥ sarvabhūtādhivāsaḥ sākṣī cetā kevalo nirguṇaśca || Śve Upa| 6|11

83. यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै ।

तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये ॥ श्वे उप ६ ।१८

you brahmāṇaṁ vidadhāti pūrvaṁ yo vai vedāṁśca prahiṇoti tasmai taṁ ha devamātmabuddhiprakāśaṁ mumukṣurvai śaraṇamahaṁ prapadye || śve upa 6|18

84. सृष्टिस्थित्यन्तकरणीं ब्रह्मविष्णुशिवात्मिकाम् ।

स संज्ञां याति भगवानेक एव जनार्दनः ॥ वि पु १ ।२ ।६४

sṛṣṭisthityantakaraṇīṁ brahmaviṣṇuśivātmikām |
sa sañjñāṁ yāti bhagavāneka eva janārdanaḥ || vi pu 1|2|64

85. सकलमिदमहं च वासुदेवः परमपुमान् परमेश्वरः स एकः ।

इति मतिरचला भवत्यनन्ते हृदयगते व्रज तान् विहाय दूरात् ॥ वि पु ३ ।७ ।३२

sakalamidamahaṁ ca vāsudevaḥ paramapumān parameśvaraḥ sa ekaḥ | iti matiracalā bhavatyanante hṛdayagate vraja tān vihāya dūrāt || vi pu 3|7|32

Verse 16

86. अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा ।

यः स्मरेत् पुण्डरीकाक्षं सबाह्याभ्यन्तरः शुचिः ॥ विष्णुधर्म ।१०९ ।६६

apavitraḥ pavitro vā sarvāvasthāṁ gato'pi vā |
yaḥ smaret puṇḍarīkākṣaṁ sabāhyābhyantaraḥ śuciḥ ||
viṣṇudharma|109|66

Verse 17

87. For words to have *pravṛtti*, access, there are five *hetus*, causes:
षष्ठी ṣaṣṭhī, गुणguṇa, क्रिया kriyā, जाति jāti, रूढि rūḍhi

88. परीक्ष्य लोकान् कर्मचितान् ब्रह्मणो निर्वेदमायान्नास्त्यकृतः कृतेन ।

तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम् ॥ मु ।उप् ।१ ।२ ।१२

parīkṣya lokān karmacitān brahmaṇo
nirvedamāyānnāstyakṛtaḥ kṛtena|
tadvijñānārthaṁ sa gurumevābhigacchet samitpāṇiḥ śrotriyaṁ
brahmaniṣṭham || mu|up|1|2|12

Verse 18

89. महान् च असौ आत्मा च इति महात्मा

mahān ca asau ātmā ca iti mahātmā

90. यच्चाप्नोति यदादत्ते यच्चात्ति विषयानिह ।

यच्चास्य सन्ततो भावस्तस्मादात्मेति कीर्त्यते ॥ लि ।पु ।७० ।१६

yaccāpnoti yadādatte yaccātti viṣayāniha |
yaccāsya santato bhāvastasmādātmeti kīrtyate || li|pu|70|16

Verse 19

91. छन्दस् chandas अनुष्टुभ् anuṣubh

92. न्यासः nyāsaḥ लघुन्यासः laghunyāsaḥ

93. उपासकः upāsakaḥ उपासनम् upāsanam

Verse 20

94. अमृतांशूद्भवः amṛtāṁśūdbhavaḥ (283) *from whom the moon was born, the source of the moon. Story from the purāṇas.*

अमृतांशोः चन्द्रस्य उद्भवो यस्मात् सः अमृतांशूद्भवः

amṛtāṁśoḥ candrasya udbhavo yasmāt saḥ amṛtāṁśūdbhavaḥ

95. देवकीनन्दनः devakīnandanaḥ (989)

देवक्याः सुतः देवकीनन्दनः ।

devakyāḥ sutaḥ devakīnandanaḥ ।

96. त्रिसामन् trisāman (574)

देवव्रतसमाख्यातैः त्रिभिः सामभिः सामगैः स्तुत इति त्रिसामा ।

devavratasamākhyātaiḥ tribhiḥ sāmabhiḥ sāmagaiḥ stuta iti trisāmā ।

97. आपेक्षिक āpekṣika आत्यन्तिक ātyantika

न्यासः nyāsaḥ

अमृतांशूद्भवो भानुरिति बीजम् । amṛtāṁśūdbhavaḥ (283) bhānuḥ (284) iti bījam ।

देवकीनन्दनः स्रष्टेति शक्तिः । devakīnandanaḥ (989) sraṣṭā (990) iti śaktiḥ ।

उद्भवः क्षोभणो देव इति परमो मन्त्रः । udbhavaḥ (373) kṣobhaṇaḥ (374) devaḥ (375) iti paramaḥ mantraḥ ।

शङ्खभृन्नन्दकी चक्रीति कीलकम् । śaṅkhabhṛt (993) nandakī (994) cakrī (995) iti kīlakam ।

शार्ङ्गधन्वा गदाधर इत्यस्त्रम् । śārṅgadhanvā (996) gadādharaḥ (997) iti astram ।

रथाङ्गपाणिरक्षोभ्य इति नेत्रम् । rathāṅgapāṇiḥ (998) akṣobhyaḥ (999) iti netram ।

त्रिसामा सामगः सामेति कवचम् । trisāmā (574) sāmagaḥ (575) sāma (576) iti kavacam ।

आनन्दं परब्रह्मेति योनिः । ānandaṁ (526) parabrahma iti yoniḥ ।

ऋतुः सुदर्शनः काल इति दिग्बन्धः । ṛtuḥ (416) sudarśanaḥ (417) kālaḥ (418) iti digbandhaḥ ।

Conclusion to Śaṅkara's Introduction

ज्योतींषि विष्णुर्भुवनानि विष्णुर्वनानि विष्णुर्गिरयो दिशश्च ।

नद्यः समुद्राश्च स एव सर्वं यदस्ति यन्नास्ति च विप्रवर्य ॥ वि । पु । २ ।१२ ।३८

jyotīṁṣi viṣṇurbhuvanāni viṣṇurvanāni viṣṇurgirayo diśaśca ।
nadyaḥ samudrāśca sa eva sarvaṁ yadasti yannāsti ca vipravarya ॥
vi। pu। 2।12।38

## सहस्रनामावलि

**sahasranāmāvali**

**ओं विश्वं विष्णुर्वषट्कारो भूतभव्यभवत्प्रभुः ।**

**भूतकृद् भूतभृद् भावो भूतात्मा भूतभावनः ॥ १ ॥**

**oṁ viśvaṁ viṣṇurvaṣaṭkāro bhūtabhavyabhavatprabhuḥ |**
**bhūtakṛd bhūtabhṛd bhāvo bhūtātmā bhūtabhāvanaḥ || 1 ||**

### ओम् *Om*

1. ओम् om is मङ्गलसूचक maṅgala-sūcaka
2. It is an अभिधान abhidhāna for ब्रह्मन् Brahman, both सगुण saguṇa and निर्गुण nirguṇa; both the वस्तु vastu and परमेश्वर parameśvara
3. अव रक्षने ava rakṣane अवति रक्षति इति ओम् avati rakṣati iti om
4. As परमात्मा paramātmā ब्रह्मन् Brahman blesses by सत्ता-स्फूर्ति-प्रदान sattā-sphūrti-pradāna
5. Footnote: अव+मन् = ओम् (अवतेः टिलोपश्च) ava+man = om (avateḥ ṭi-lopaśca)
6. ओम् om is a प्रतीक pratīka for ईश्वर īśvara, not a प्रतिमा pratimā
7. Footnote: भूतं भवद्भविष्यदिति सर्वमोङ्कर एव । यच्चान्यत् त्रिकालातीतं तदप्योङ्कार एव ॥ मा उप् १ ।१ bhūtaṁ bhavadbhaviṣyaditi sarvamoṅkara eva | yaccānyat trikālātītaṁ tadapyoṅkāra eva || mā up 1|1

**1. विश्वम् *Viśvam***

विश्वस्य जगतः कारणत्वेन हि विश्वम् इत्युच्यते। यद्वा परस्मात् पुरुषात् न भिन्नम् इदम् विश्वं परमार्थतः। किञ्च संहृतौ विशन्ति सर्वाणि भूतान्यस्मिन्निति विश्वं ब्रह्म। सकलं जगत् कार्यभूतम् एष विशतीति विश्वम्।

viśvasya jagataḥ kāraṇatvena hi viśvam ityucyate | yadvā parasmāt puruṣāt na bhinnam idam viśvaṁ paramārthataḥ | kiñca saṁhṛtau viśanti sarvāṇi bhūtānyasminniti viśvaṁ brahma | sakalaṁ jagat kāryabhūtam eṣa viśatīti viśvam |

1. विविधप्रत्ययगम्यं विश्वम् Vividha-pratyaya-gamyaṁ viśvam
2. विश्वस्य जगतः कारणत्वेन हि विश्वम् इति ऊच्यते। viśvasya jagataḥ kāraṇatvena hi viśvam iti ūcyate |
3. यद्वा परस्मात् पुरुषात् इदम् विश्वम् परमार्थतः न भिन्नम् yadvā parasmāt puruṣāt idam viśvam paramārthataḥ na bhinnam
4. विशति इति विश्वम् viśati iti viśvam
5. संहृतौ विशन्ति सर्वाणि भूतानि अस्मिन् इति विश्वम् ब्रह्म। saṁhṛtau viśanti sarvāṇi bhūtāni asmin iti viśvam brahma |
6. Footnote: पुरुष एवेदं विश्वम्। ब्रह्म एव इदं सर्वम्। मु उप् २।२।१० ११ puruṣa evedaṁ viśvam | brahma eva idaṁ sarvam | mu up 2|2|10 11
7. Footnote: तत् सृष्ट्वा तदेवानुप्राविशत्। तै उप् २।३ tat sṛṣṭvā tadevānuprāviśat | tai up 2|3
8. Footnote: यत् प्रयन्ति अभिसंविशन्ति । तै उप् ३।१ yat prayanti abhisaṁviśanti | tai up 3|1
9. Footnote: आद्यं च त्र्यक्षरं ब्रह्म त्रयी यस्मिन् प्रतिष्ठिता। एकाक्षरं परं ब्रह्म प्राणायामः परं तपः॥ अत्रि १।११ ādyaṁ ca tryakṣaraṁ brahma trayī yasmin pratiṣṭhitā | ekākṣaraṁ paraṁ brahma prāṇāyāmaḥ paraṁ tapaḥ || atri 1|11

10. Footnote: प्रणवाद्यास्त्रयो वेदाः प्रणवे पर्यवस्थिताः। वाङ्मयं प्रणवं सर्वं तस्मात् प्रणवमभ्यसेत्॥ अत्रि १।९ praṇavādyāstrayo vedāḥ praṇave paryavasthitāḥ | vāṅmayaṁ praṇavaṁ sarvaṁ tasmāt praṇavamabhyaset || atri 1|9

11. Footnote: तज्जलानिति शान्त उपासीत। छा उप् ३।१४।१ tajjalāniti śānta upāsīta | chāa up 3|14|1

12. Footnote: श्रूयतां धर्मसर्वस्वं श्रुत्वा चैवावधार्यताम्। आत्मनः प्रतिकूलानि परेषां न समाचरेत्॥ विष्णुधर्म। ३।२५५।४४ śrūyatāṁ dharmasarvasvaṁ śrutvā caivāvadhāryatām |ātmanaḥ pratikūlāni pareṣāṁ na samācaret || viṣṇudharma| 3|255|44

13. Footnote: जडानामविवेकानामशूराणामपि प्रभो। भाग्यभोग्यानि राज्यानि सन्त्यनीतिमतामपि॥ तस्माद्यतेत पुण्येषु य इच्छेन्महतीं श्रियम्। यतितव्यं समत्वेन निर्वाणमपि चेच्छता॥वि।पु।१।१९।४५ jaḍānāmavivekānāmaśūrāṇāmapi prabho | bhāgyabhogyāni rājyāni santyanītimatāmapi || tasmādyateta puṇyeṣu ya icchenmahatīṁ śriyam | yatitavyaṁ samatvena nirvāṇamapi cecchatā ||vi. pu|1|19|45

14. Footnote: न चलति निजवर्णधर्मतो यः सममतिरात्मसुहृद्विपक्षपक्षे। न हरति न च हन्ति किञ्चिदुच्चैः स्थितमनसं तमवेहि विष्णुभक्तम्॥ विमलमतिरमत्सरः प्रशान्तः शुचिचरितोऽखिलसत्त्वमित्रभूतः। प्रियहितवचनोऽस्तमानमायो वसति सदा हृदि तस्य वासुदेवः॥वि।पु। ३।७।२०।२४ na calati nijavarṇadharmato yaḥ samamatirātmasuhṛdvipakṣapakṣe | na harati na ca hanti kiñciduccaiḥ sthitamanasaṁ tamavehi viṣṇubhaktam || vimalamatiramatsaraḥ praśāntaḥ śucicarito'khilasattvamitrabhūtaḥ | priyahitavacano'stamānamāyo vasati sadā hṛdi tasya vāsudevaḥ ||vipu| 3|7|20|24

15. Footnote: यमनियमविधूतकल्मषानामनुदिनमच्युतासक्तमानसानाम्।

अपगतमदमानमत्सराणां व्रज भट दूरतरेण मानवानाम्॥ वि। पु ३।७।२६

yamaniyamavidhūtakalmaṣānāmanudinamacyutāsaktamānasānā m | apagatamadamānamatsarāṇāṁ vraja bhaṭa dūratareṇa mānavānām || vi| pu 3|7|26

16. Footnote: नाविष्णुः कीर्तयेद् विष्णुं नाविष्णुर्विष्णुमर्चयेत्। नाविष्णुः संस्मरेद् विष्णुं नाविष्णुर्विष्णुमाप्नुयात्॥ nāviṣṇuḥ kīrtayed viṣṇuṁ nāviṣṇurviṣṇumarcayet | nāviṣṇuḥ saṁsmared viṣṇuṁ nāviṣṇurviṣṇumāpnuyāt || MB

**2. विष्णुः** ***Viṣṇuḥ***

वेवेष्टि व्याप्नोति इति विष्णुः। देशकालवस्तुपरिच्छेदशून्य इत्यर्थः।

veveṣṭi vyāpnoti iti viṣṇuḥ | deśakālavastuparicchedaśūnya ityarthaḥ

17. Footnote: विष् (व्याप्तौ)3rd conj. + नु + = विष्णु or विश् (प्रवेशने) 6th conj. + नुक्+= विष्णु viṣ (vyāptau) 3rd conj. + nu + = viṣṇu or viś (praveśane) 6th conj. + nuk + = viṣṇu

18. Footnote: यस्माद्विष्टमिदं सर्वं तस्य शक्त्या महात्मनः। तस्मादेवोच्यते वष्णुर्विशेर्धातोः प्रवेशनात्॥ yasmādviṣṭamidaṁ sarvaṁ tasya śaktyā mahātmanaḥ | tasmādevocyate viṣṇurviśerdhātoḥ praveśanāt || Vi.Pu.3.1.45

**3. वषट्कारः** ***Vaṣaṭkāraḥ***

यदुद्देशेन अध्वरे वषट्क्रियते स वषट्कारः॥ यस्मिन् यज्ञे वा वषट्क्रिया। येन वषट्कारादि-मन्त्रात्मना वा देवान् प्रीणयति स वषट्कारः। yaduddeśena adhvare vaṣaṭ kriyate sa vaṣaṭkāraḥ || yasmin yajñe vā vaṣaṭ kriyā | yena vaṣaṭ kārādimantrātmanā vā devān prīṇayati sa vaṣaṭkāraḥ |

19. Footnote: आकाशात् पतितं तोयम् यथा गच्छति सागरम् ।

सर्वदेवनमस्कारः केशवं प्रतिगच्छति ॥ ākāśāt patitaṁ toyam yathā gacchati sāgaram । sarvadevanamaskārah keśavaṁ pratigacchati ।।

**4. भूतभव्यभवत्प्रभुः *Bhūtabhavyabhavatprabhuḥ***

भूतं भव्यं भवच्च इति भूतभव्यभवन्ति तेषां प्रभुः । कालभेदम् अनादृत्य सन्मात्रप्रतियोगिकम् ऐश्वर्यं तस्य इति प्रभुत्वम् ।

bhūtaṁ bhavyaṁ bhavacca iti bhūtabhavyabhavanti teṣāṁ prabhuḥ । kālabhedam anādṛtya sanmātrapratiyogikam aiśvaryaṁ tasya iti prabhutvam ।

**5. भूतकृत् *Bhūtakṛt***

भूतानि करोति इति भूतकृत् । भूतानि कृन्तति कृणोति हिनस्तीति वा भूतकृत् ।

bhūtāni karoti iti bhūtakṛt । bhūtāni kṛntati kṛṇoti hinastīti vā bhūtakṛt ।

**6. भूतभृत् *Bhūtabhṛt***

भूतानि बिभर्ति धारयति पोषयति इति वा भूतभृत् ।

bhūtāni bibharti dhārayati poṣayati iti vā bhūtabhṛt ।

**7. भावः *Bhāvaḥ***

प्रपञ्चरूपेण भवतीति केवलं भवतीत्येव वा भावः । भवनं भावः सत्तत्मको वा ।

prapañcarūpeṇa bhavatīti kevalaṁ bhavatītyeva vā bhāvaḥ । bhavanaṁ bhāvaḥ sattatmako vā ।

**8. भूतात्मा *Bhūtātmā***

भूतात्मा भूतानामात्मा अन्तर्यामी ।

bhūtātmā bhūtānāmātmā antaryāmī ।

**9. भूतभावनः *bhūtabhāvanaḥ***

भूतानि भावयति जनयति वर्धयतीति वा भूतभावनः ।

bhūtāni bhāvayati janayati vardhayatīti vā bhūtabhāvanaḥ ।

**पूतात्मा परमात्मा च मुक्तानां परमा गतिः ।**

**अव्ययः पुरुषः साक्षी क्षेत्रज्ञोऽक्षर एव च ॥ २ ॥**

**pūtātmā paramātmā ca muktānāṁ paramā gatiḥ |**
**avyayaḥ puruṣaḥ sākṣī kṣetrajño'kṣara eva ca || 2 ||**

10. **पूतात्मा** *Pūtātmā*

पुत आत्मा यस्य सः पूतात्मा

puta ātmā yasya saḥ pūtātmā

11. **परमात्मा** *Paramātmā*

परमश्च असौ आत्मा चेति परमात्मा । कार्यकारणविलक्षणो नित्यशुद्धबुद्धमुक्तास्वभावः ।

paramaśca asau ātmā ceti paramātmā | kāryakāraṇavilakṣaṇo nityaśuddhabuddhamuktāsvabhāvaḥ |

12. **मुक्तानां परमा गतिः** *Muktānāṁ paramā gatiḥ*

मुक्तानां परमा प्रकृष्टा गतिः गन्तव्या देवता पुनरावृत्त्यसम्भवात् तद्गतस्स्येति मुक्तानां परमा गतिः ।

muktānāṁ paramā prakṛṣṭā gatiḥ gantavyā devatā punarāvṛttyasambhavāt tadgatssyeti muktānāṁ paramā gatiḥ |

13. **अव्ययः** *Avyayaḥ*

नास्य व्ययः विनाशो विकारो विद्यत इति अव्ययः ।

nāsya vyayaḥ vināśo vikāro vidyata iti avyayaḥ |

14. **पुरुषः** *Puruṣaḥ*

**परं शरीरं तस्मिन् शेते इति पुरुषः। पुरा एव आसीदिति पुरुषः। पुरुषु उत्कर्षशालिषु सीदतीति पुरुषः। पुरूणि - फलानि सनोति - ददातीति पुरुषः। पुरूणि भुवनानि संहारसमये स्यति अन्तं करोतीति पुरुषः। पूरणात् सदनाद्वा पुरुषः।**

paraṁ śarīraṁ tasmin śete iti puruṣaḥ | purā eva āsīditi puruṣaḥ | puruṣu utkarṣaśāliṣu sīdatīti puruṣaḥ | purūṇi phalāni sanoti dadātīti puruṣaḥ | purūṇi bhuvanāni saṁhārasamaye syati antaṁ karotīti puruṣaḥ | pūraṇāt sadanādvā puruṣaḥ |

15. **साक्षी** *Sākṣī*

**साक्षाद् अव्ययधानेन स्वरूपबोधेन ईक्षते पश्यति सर्वमिति साक्षी।**

sākṣād avyayadhānena svarūpabodhena īkṣate paśyati sarvamiti sākṣī |

16. **क्षेत्रज्ञः** *Kṣetrajñaḥ kṣetrajñāḥ*

**क्षेत्रं शरीरं जानातीति क्षेत्रज्ञः॥**

kṣetraṁ śarīraṁ jānātīti kṣetrajñaḥ ||

17. **अक्षरः** *Akṣaraḥ*

**न क्षरतीति अक्षरः। अश्नोतेर्वा सरप्रत्ययान्तस्य रूपमक्षर इति।**

na kṣaratīti akṣaraḥ | aśnotervā sarapratyayāntasya rūpamakṣara iti |

**योगो योगविदां नेता प्रधानपुरुषेश्वरः ।**

**नारसिंहवपुः श्रीमान् केशवः पुरुषोत्तमः ॥ ३ ॥**

**yogo yogavidāṁ netā pradhānapuruṣeśvaraḥ |**
**nārasiṁhavapuḥ śrīmān keśavaḥ puruṣottamaḥ || 3 ||**

18. **योगः** *Yogaḥ*

ज्ञानेन्द्रियाणि सर्वाणि निगृह्य मनसा सह । एकत्वभावना योगः क्षेत्रज्ञपरमात्मनोः ॥

तदवाप्यतया योग इति योगविदो विदुः । इति ।

jñānendriyāṇi sarvāṇi nigṛhya manasā saha | ekatvabhāvanā yougaḥ kṣetrajñaparamātmanoḥ || tadavāpyatayā yoga iti yogavido viduḥ | iti |

19. **योगविदां नेता** *Yogavidāṁ netā*

योगं विदन्ति विचारयन्ति जानन्ति लभन्त इति वा योगविदः । तेषं ज्ञानिनां नेता

योगक्षेमवहनादिना इति योगविदां नेता ।

yogaṁ vidanti vicārayanti jānanti labhanta iti vā yogavidaḥ | teṣaṁ jñāninām̐ netā yogakṣemavahanādinā iti yogavidāṁ netā |

20. **प्रधानपुरुषेश्वरः** *Pradhānapuruṣeśvaraḥ*

प्रधानं  प्रकृतिर्माया पुरुषः जीवः तयोरीश्वरः प्रधानपुरुषेश्वरः ।

pradhānaṁ  prakṛtirmāyā puruṣaḥ jīvaḥ tayorīśvaraḥ pradhānapuruṣeśvaraḥ |

21. **नारसिंहवपुः** *Nārasiṁhavapuḥ*

नरस्य सिंहस्य च अवयवा यस्मिन् लक्ष्यन्ते तद्वपुर्यस्य सः नारसिंहवपुः ।

narasya siṁhasya ca avayavā yasmin lakṣyante tadvapuryasya saḥ nārasiṁhavapuḥ |

22. **श्रिमान्** *Śrimān*

यस्य वक्षसि नित्यं वसति श्रीः स श्रीमान्। श्रिया युक्तः श्रियः पतिः श्रीमान्।

yasya vakṣasi nityaṁ vasati śrīḥ sa śrīmān । śriyā yuktaḥ śriyaḥ patiḥ śrīmān ।

23. **केशवः** *Keśavaḥ*

अभिरूपाः केशा यस्य सः केशवः। यद्वा कश्च अश्च ईशश्च त्रिमूर्तयः केशाः ते यद्वशे वर्तन्ते सः केशवः। केशिवधाद्वा केशवः।

abhirūpāḥ keśā yasya saḥ keśavaḥ । yadvā kaśca aśca īśaśca trimūrtayaḥ keśāḥ te yadvaśe vartante saḥ keśavaḥ । keśivadhādvā keśavaḥ ।

24. **पुरुषोत्तमः** *Puruṣottamaḥ*

पुरुषाणामुत्तमः पुरुषोत्तमः। पुरुषश्च असौ उत्तमश्च पुरुषोत्तमः।

puruṣāṇāmuttamaḥ puruṣottamaḥ । puruṣaśca asau uttamaśca puruṣottamaḥ ।

**सर्वः शर्वः शिवः स्थाणुर्भूतादिर्निधिरव्ययः।**
**संभवो भावनो भर्ता प्रभवः प्रभुरीश्वरः॥ ४॥**

**sarvaḥ śarvaḥ śivaḥ sthāṇurbhūtādirnidhiravyayaḥ ।**
**sambhavo bhāvano bhartā prabhavaḥ prabhurīśvaraḥ ।। 4 ।।**

25. **सर्वः** *Sarvaḥ*

असतश्च सतश्चैव सर्वस्य प्रभवाप्ययात्। सर्वस्य सर्वदा ज्ञानात्सर्वमेनं प्रचक्षते॥

asataśca sataścaiva sarvasya prabhavāpyayāt । sarvasya sarvadā jñānātsarvamenaṁ pracakṣate ।।

26. **शर्वः** ***Śarvaḥ***

**शृणाति संहारसमये संहरति संहारयति वा सकलाः प्रजाः इति शर्वः ।**

śṛṇāti saṁhārasamaye saṁharati saṁhārayati vā sakalāḥ prajāḥ iti śarvaḥ ।

27. **शिवः** ***Śivaḥ***

**निस्त्रैगुण्यतया शुद्धत्वात् शिवः ।**

nistraiguṇyatayā śuddhatvāt śivaḥ ।

28. **स्थाणुः** ***Sthāṇuḥ***

**स्थिरत्वात् स्थाणुः ।**

sthiratvāt sthāṇuḥ ।

29. **भूतादिः** ***Bhūtādiḥ***

**भूतानामादिकारणत्वात् भूतादिः ।**

bhūtānāmādikāraṇatvāt bhūtādiḥ ।

30. **निधिरव्ययः** ***Nidhiravyayaḥ***

**प्रलयकाले अस्मिन् सर्वं निधीयत इति निधिः ।**

pralayakāle asmin sarvaṁ nidhīyata iti nidhiḥ ।

31. **सम्भवः** ***Sambhavaḥ***

**स्वेच्छया समीचीनं भवनमस्येति सम्भवः ।**

svecchayā samīcīnaṁ bhavanamasyeti sambhavaḥ ।

32. भावनः *Bhāvanaḥ*

सर्वेषां भोक्तॄणां फलानि भावयतीति भावनः ।

sarveṣāṁ bhoktṝṇāṁ phalāni bhāvayatīti bhāvanaḥ ।

33. भर्ता *Bhartā*

प्रपञ्चस्याधिष्ठानत्वेन भरणात् भर्ता ।

prapañcasyādhiṣṭhānatvena bharaṇāt bhartā ।

34. प्रभवः *Prabhavaḥ*

प्रकर्षेण महाभूतानि अस्मात् प्रभवन्ति, जायन्ते इति प्रभवः । प्रकृष्टो भवः, जन्म अस्येति वा ।

prakarṣeṇa mahābhūtāni asmāt prabhavanti jāyante iti prabhavaḥ ।
prakṛṣṭo bhavaḥ janma asyeti vā ।

35. प्रभुः *Prabhuḥ*

सर्वासु क्रियासु सामर्थ्यातिशयवान् प्रभुः ।

sarvāsu kriyāsu sāmarthyātiśayavān prabhuḥ ।

36. ईश्वरः *Īśvaraḥ*

निरुपाधिकं ऐश्वर्यम् अस्येति ईश्वरः ।

nirupādhikam aiśvaryam asyeti īśvaraḥ ।

**स्वयंभूः शंभुरादित्यः पुष्कराक्षो महास्वनः ।**

**अनादिनिधनो धाता विधाता धातुरुत्तमः ॥ १५ ॥**

**svayambhūḥ śambhurādityaḥ puṣkarākṣo mahāsvanaḥ |**
**anādinidhano dhātā vidhātā dhāturuttamaḥ || 15 ||**

37. **स्वयम्भूः** *Svayambhūḥ*

स्वयमेव भवतीति स्वयम्भूः । अथवा स्वयंभूः परमेश्वरः स्वयमेव स्वतन्त्रो भवति । न परन्तन्त्रः । सर्वेषामुपरि भवति इति वा स्वयम्भूः ।

svayameva bhavatīti svayambhūḥ | athavā svayambhūḥ parameśvaraḥ svayameva svatantro bhavati | na parantantraḥ | sarveṣāmupari bhavati iti vā svayambhūḥ |

38. **शंभुः** *Śambhuḥ*

शं सुखं भक्तानां (मङ्गलं मोक्षं ) भावयतीति शंभुः ।

śaṁ sukhaṁ bhaktānāṁ (maṅgalaṁ mokṣaṁ) bhāvayatīti śambhuḥ |

39. **आदित्यः** *Ādityaḥ* (563)

आदित्यमण्डलान्तस्थो हिरण्मयः पुरुषः आदित्यः । द्वादशादित्येषु विष्णुर्वा । अदितेः अखण्डिताया मह्या अयं पतिरिति वा । यथा आदित्य एक एव अनेकेषु जलभाजनेषु अनेकवत् प्रतिभासते एवमनेकेषु शरीरेषु एक एवात्मा अनेकवत् प्रतिभासत इत्यादित्यसाधर्म्याद्वा आदित्यः

ādityamaṇḍalāntastho hiraṇmayaḥ puruṣaḥ ādityaḥ | dvādaśādityeṣu viṣṇurvā | aditeḥ akhaṇḍitāyā mahyā ayaṁ patiriti vā | yathā āditya eka eva anekeṣu jalabhājaneṣu anekavat pratibhāsate evamanekeṣu śarīreṣu eka evātmā anekavat pratibhāsata ityādityasādharmyādvā ādityaḥ

40. **पुष्कराक्षः** *Puṣkarākṣaḥ*

पुष्करेणोपमिते अक्षिणी यस्येति पुष्कराक्षः।

puṣkareṇopamite akṣiṇī yasyeti puṣkarākṣaḥ ।

41. **महास्वनः** *Mahāsvanaḥ*

महान् पूजितः स्वनो नादो वा श्रुतिलक्षणो यस्य सः महास्वनः।

mahān pūjitaḥ svano nādo vā śrutilakṣaṇo yasya saḥ mahāsvanaḥ ।

42. **अनादिनिधनः** *Anādinidhanaḥ*

आदिः - जन्म निधनं - विनाशः तद्द्वयं यस्य न विद्यते सः अनादिनिधनः।

Ādiḥ - janma nidhanaṁ - vināśaḥ taddvayaṁ yasya na vidyate saḥ anādinidhanaḥ ।

43. **धाता** *Dhātā*

(अनन्तादिरूपेण) विश्वं बिभर्तीति धाता।

(anantādirūpeṇa) viśvaṁ bibhartīti dhātā ।

44. **विधाता** *Vidhātā*

कर्मणां तत्फलानां च कर्ता विधाता। अनन्तादीनामपि धारकत्वात् विशेषेण दधातीति वा।

karmaṇāṁ tatphalānāṁ ca kartā vidhātā । anantādīnāmapi dhārakatvāt viśeṣeṇa dadhātīti vā ।

45. **धातुरुत्तमः** *Dhāturuttamaḥ*

धातुः - विरिञ्चाद् उत्कृष्ट इति वा धातुरुत्तमः। सर्वधातुभ्यः - पृथिव्यादिभ्यः उत्कृष्टश्चिदेव धातुरित्यर्थः। कार्यकारणप्रपञ्चधारणाच्चिदेव धातु। सर्वेषामुद्गतानाम् अतिशयेन उद्गतत्वादुत्तमः।

dhātuḥ - viriñcād utkṛṣṭa iti vā dhāturuttmaḥ | sarvadhātubhyaḥ - pṛthivyādibhyaḥ utkṛṣṭaścideva dhāturityarthaḥ | kāryakāraṇaprapañcadhāraṇāccideva dhātu | sarveṣāmudgatānām atiśayena udgatatvāduttamaḥ |

**अप्रमेयो हृषीकेशः पद्मनाभोऽमरप्रभुः ।**

**विश्वकर्मा मनुस्त्वष्टा स्थविष्ठः स्थविरो ध्रुवः ॥ ६ ॥**

**aprameyo hṛiṣīkeśaḥ padmanābho'maraprabhuḥ |**
**viśvakarmā manustvaṣṭā sthaviṣṭhaḥ sthaviro dhruvaḥ || 6 ||**

**46. अप्रमेयः** *Aprameyaḥ*

शब्दादिरहितत्वात् न प्रत्यक्षगम्यः। नापि अनुमानगम्यः तद्व्याप्तलिङ्गाभावात्। नापि उपमानसिद्धः निर्भागत्वेन सादृश्याभावात्। नापि अर्थापत्तिग्रह्यः तद्विना अनुपपद्यमानस्य असम्भवात्। नाप्यभावगोचरः भावरूपत्वात् अभावसक्षित्वाच्च।
नापि शास्त्रप्रमाणवेद्यः प्रमाणजन्यातिशयाभावात्। प्रमाणादिसाक्षित्वेन प्रकाशस्वरूपस्य प्रमाणाविषयत्वेऽपि अध्यस्तातद्रुपनिवर्तकत्वेन शास्त्रप्रमाणकत्वम् इति अप्रमेयः। साक्षिरूपत्वात्॥

śabdādirahitatvāt na pratyakṣagamyaḥ | nāpi anumānagamyaḥ tadvyāptaliṅgābhāvāt | nāpi upamānasiddhaḥ nirbhāgatvena sādṛśyābhāvāt | nāpi arthāpattigrahyaḥ tadvinā anupapadyamānasya asambhavāt | nāpyabhāvagocaraḥ bhāvarūpatvāt abhāvasakṣitvācca |
nāpi śāstrapramāṇavedyaḥ pramāṇajanyātiśayābhāvāt | pramāṇādisākṣitvena prakāśasvarūpasya pramāṇāviṣayatve'pi adhyastātadrupanivartakatvena śāstrapramāṇakatvam iti aprameyaḥ | sākṣirūpatvāt ||

47. **हृषीकेशः** *Hṛṣīkeśaḥ*

हृषीकाणि इन्द्रियाणि तेषामीशः क्षेत्रज्ञरूपभाक् । यद्वा इन्द्रियाणि यस्य वशे वर्तन्ते स परमात्मा हृषीकेशः। यस्य वा सूर्यरूपस्य चन्द्ररूपस्य जगत्प्रीतिकरा हृष्टाः केशा रश्मयः सः हृषिकेशः।

hṛṣīkāṇi indriyāṇi teṣāmīśaḥ kṣetrajñarūpabhāk । yadvā indriyāṇi yasya vaśe vartante sa paramātmā hṛṣīkeśaḥ । yasya vā sūryarūpasya candrarūpasya jagatprītikarā hṛṣṭāḥ keśā raśmayaḥ saḥ hṛṣikeśaḥ ।

48. **पद्मनाभः** *Padmanābhaḥ*

सर्वजगत्कारणं पद्मं नाभौ यस्य सः पद्मनाभः।

sarvajagatkāraṇaṁ padmaṁ nābhau yasya saḥ padmanābhaḥ ।

49. **अमरप्रभुः** *Amaraprabhuḥ*

अमराणां प्रभुः अमरप्रभुः।

amarāṇāṁ prabhuḥ amaraprabhuḥ ।

50. **विश्वकर्मा** *Viśvakarmā*

विश्वं कर्म क्रिया यस्य सः विश्वकर्मा। क्रियत इति जगत् कर्म विश्वं कर्म यस्येति वा।

viśvaṁ karma kriyā yasya saḥ viśvakarmā । kriyata iti jagat karma viśvaṁ karma yasyeti vā ।

51. **मनुः** *Manuḥ*

मननात् मनुः मन्त्रो वा प्रजापतिर्वा मनुः।

mananāt manuḥ mantro vā prajāpatirvā manuḥ ।

52. **त्वष्टा** *Tvaṣṭā*

संहारसमये सर्वभूततनूकरणात् त्वष्टा। त्वक्षतेस्तनूकरणार्थात् तृच्प्रत्ययः।

saṁhārasamaye sarvabhūtatanūkaraṇāt tvaṣṭā |
tvakṣatestanūkaraṇārthāt tṛcpratyayaḥ ||

53. **स्थविष्ठः** *Sthaviṣṭhaḥ*

अतिशयेन स्थूलः स्थविष्ठः।

atiśayena sthūlaḥ sthaviṣṭhaḥ |

54. **स्थविरो ध्रुवः** *Sthaviro dhruvaḥ*

पुराणः स्थविरः। वयोवचनो वा। स्थिरत्वाद् ध्रुवः। स्थविरो ध्रुव इत्येकं नाम सविशेषणम्।

purāṇaḥ sthaviraḥ | vayovacano vā | sthiratvād dhruvaḥ | sthaviro dhruva ityekaṁ nāma saviśeṣaṇam |

**अग्राह्यः शाश्वतः कृष्णो लोहिताक्षः प्रतर्दनः।**

**प्रभूतस्त्रिककुब्धाम पवित्रं मङ्गलं परम्॥ ७॥**

**agrāhyaḥ śāśvataḥ kṛṣṇo lohitākṣaḥ pratardanaḥ |**
**prabhūtastrikakubdhāma pavitraṁ maṅgalaṁ param || 7 ||**

**55. अग्राह्यः** *Agrāhyaḥ*

कर्मेन्द्रियैः न गृह्यत इति अग्राह्यः। ग्रहणायोग्यः।

karmendriyaiḥ na gṛhyata iti agrāhyaḥ | grahaṇāyogyaḥ |

56. **शाश्वतः** *Śāśvataḥ*

शश्वत् सर्वेषु कालेषु भवतीति शाश्वतः।

śaśvat sarveṣu kāleṣu bhavatīti śāśvataḥ |

57. **कृष्णः** ***Kṛṣṇaḥ***

सदानन्दात्मकः कृष्णः। कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः। विष्णुः तद्भावयोगात् च कृष्णो भवति शाश्वतः॥ इति व्यासवचनात्। कृष्णवर्णात्मकत्वाद्वा।

sadānandātmakaḥ kṛṣṇaḥ | kṛṣirbhūvācakaḥ śabdo ṇaśca nirvṛtivācakaḥ | viṣṇuḥ tadbhāvayogāt ca kṛṣṇo bhavati śāśvataḥ || iti vyāsavacanāt | kṛṣṇavarṇātmakatvādvā |

58. **लोहिताक्षः** ***Lohitākṣaḥ***

लोहिते अक्षिणी यस्येति लोहिताक्षः।

lohite akṣiṇī yasyeti lohitākṣaḥ |

59. **प्रतर्दनः** ***Pratardanaḥ***

प्रलये भूतानि प्रतर्दयति हिनस्तीति प्रतर्दनः।

pralaye bhūtāni pratardayati hinastīti pratardanaḥ |

60. **प्रभूतः** ***Prabhūtaḥ***

ज्ञानैश्वर्यादिगुणैः संपन्नः प्रभूतः।

jñānaiśvaryādiguṇaiḥ sampannaḥ prabhūtaḥ |

61. **त्रिककुब्धाम** ***Trikakubdhāma***

ऊर्ध्वाधोमध्यभेदेन तिसृणां ककुभामपि धामेति त्रिककुब्धामेत्येकं नाम।

ūrdhvādhomadhyabhedena tisṛṇāṁ kakubhāmapi dhāmeti trikakubdhāmetyekaṁ nāma |

62. **पवित्रम्** *Pavitram*

येन पुनाति यो वा पुनाति ऋषिर्देवता वा तत् पवित्रम्।

yena punāti yo vā punāti ṛṣirdevatā vā tat pavitram |

63**. मङ्गलम् परम्** *Maṅgalam param*

अशुभानि निराचष्टे तनोति शुभसन्ततिम्। स्मृतिमात्रेण यत्पुंसां ब्रह्म तन्मङ्गलं विदुः॥ इति विष्णुपुराणवचनात्। कल्याणरूपत्वाद्वा मङ्गलम्। परं सर्वभूतेभ्य उत्कृष्टं ब्रह्म।

aśubhāni nirācaṣṭe tanoti śubhasantatim | smṛtimātreṇa yatpuṁsāṁ brahma tanmaṅgalaṁ viduḥ || iti viṣṇupurāṇavacanāt | kalyāṇarūpatvādvā maṅgalam | paraṁ sarvabhūtebhya utkṛṣṭaṁ brahma |

**ईशानः प्राणदः प्राणो ज्येष्ठः श्रेष्ठः प्रजापतिः।**

**हिरण्यगर्भो भूगर्भो माधवो मधुसूदनः॥ ८॥**

**īśānaḥ prāṇadaḥ prāṇo jyeṣṭhaḥ śreṣṭhaḥ prajāpatiḥ |**
**hiraṇyagarbho bhūgarbho mādhavo madhusūdanaḥ || 8 ||**

64. **ईशानः** *Īśānaḥ*

सर्वभूतनियन्तृत्वात् ईशानः।

sarvabhūtaniyantṛtvāt īśānaḥ |

65. **प्राणदः** *Prāṇadaḥ*

प्राणान् ददाति चेष्टयतीति प्राणदः। यद्वा कालात्मना प्राणान् द्यति खण्डयतीति वा प्राणान् दायति शोधयतीति वा प्राणान् दाति लुनातीति वा प्रणदः।

prāṇān dadāti ceṣṭayatīti prāṇadaḥ | yadvā kālātmanā prāṇān dyati khaṇḍayatīti vā prāṇān dāyati śodhayatīti vā prāṇān dāti lunātīti vā praṇadaḥ |

66. **प्राणः** *Prāṇaḥ*

**प्राणितीति प्राणः क्षेत्रज्ञः परमात्मा वा।**

prāṇitīti prāṇaḥ kṣetrajñaḥ paramātmā vā ।

67. **ज्येष्ठः** *Jyeṣṭhaḥ*

**वृद्धतमो ज्येष्ठ। सर्वकारणत्वाद्वा ज्येष्ठः।**

vṛddhatamo jyeṣṭha । sarvakāraṇatvādvā jyeṣṭhaḥ ।

68. **श्रेष्ठः** *Śreṣṭhaḥ*

**प्रशस्यतमः श्रेष्ठः। सर्वातिशयत्वाद्वा श्रेष्ठः।**

praśasyatamaḥ śreṣṭhaḥ । sarvātiśayatvādvā śreṣṭhaḥ ।

69. **प्रजापतिः** *Prajāpatiḥ*

**ईश्वरत्वेन सर्वासां प्रजानां पतिः प्रजापतिः।**

īśvaratvena sarvāsāṁ prajānāṁ patiḥ prajāpatiḥ ।

70. **हिरण्यगर्भः** *Hiraṇyagarbhaḥ*

**हिरण्मयाण्डान्तर्वर्तित्वात् हिरण्यबर्भो ब्रह्मा विरिञ्चिः तदात्मा हिरण्यबर्भः।**

hiraṇmayāṇḍāntarvartitvāt hiraṇyabarbho brahmā viriñciḥ tadātmā hiraṇyabarbhaḥ ।

71. **भूगर्भः** *Bhūgarbhaḥ*

**भूः गर्भे यस्य सः भूगर्भः।**

bhūḥ garbhe yasya saḥ bhūgarbhaḥ ।

72. **माधवः** *Mādhavaḥ*

माया श्रियः धवः पतिः माधवः। मधुविद्या-अवबोध्यत्वाद्वा। 'मौनाद् ध्यानाच्च योगाच्च विद्धि भारत माधवम्' इति व्यासवचनात्वाद्वा माधवः।

māyā śriyaḥ dhavaḥ patiḥ mādhavaḥ | madhuvidyā-avabodhyatvādvā | 'maunād dhyānācca yogācca viddhi bhārata mādhavam' iti vyāsavacanātvādvā mādhavaḥ |

73. **मधुसूदनः** *Madhusūdanaḥ*

मधुनामानम् असुरं सूदितवानिति मधुसूदनः। मधुवत् इष्टत्वात् अहंकारः मधु।

madhunāmānam asuraṁ sūditavāniti madhusūdanaḥ | madhuvat iṣṭatvāt ahaṅkāraḥ madhu |

**ईश्वरो विक्रमी धन्वी मेधावी विक्रमः क्रमः।**
**अनुत्तमो दुराधर्षः कृतज्ञः कृतिरात्मवान्॥ ९॥**

**īśvaro vikramī dhanvī medhāvī vikramaḥ kramaḥ |**
**anuttamo durādharṣaḥ kṛtajñaḥ kṛtirātmavān || 9 ||**

74. **ईश्वरः** *Īśvaraḥ*

सर्वशक्तिमत्त्वात् ईश्वरः।

sarvaśaktimattvāt īśvaraḥ |

75. **विक्रमी** *Vikramī*

विक्रमः शौर्यम् तद्योगात् विक्रमी।

vikramaḥ śauryam tadyogāt vikramī |

76. धन्वी *Dhanvī*

धनुः अस्यास्तीति धन्वी। रामः शस्त्रभृतामहम् इति भगवद्वचनात्।

dhanuḥ asyāstīti dhanvī | rāmaḥ śastrabhṛtāmaham iti bhagavadvacanāt |

77. मेधावी *Medhāvī*

मेधा - बहुग्रन्थ-धारण-सामर्थ्यम्, सा यस्यास्ति स मेधावी।

medhā – bahugrantha-dhāraṇa-sāmarthyam, sā yasyāsti sa medhāvī |

78. विक्रमः *Vikramaḥ*

विचक्रमे जगद्विश्वं तेन विक्रमः। विना-गरुडेन पक्षिणा क्रमाद्वा विक्रमः।

vicakrame jagadviśvaṁ tena vikramaḥ | vinā-garuḍena pakṣiṇā kramādvā vikramaḥ |

79. क्रमः *Kramaḥ*

क्रमणात् क्रमहेतुत्वाद्वा क्रमः।

kramaṇāt kramahetutvādvā kramaḥ |

80. अनुत्तमः *Anuttamaḥ*

अविद्यमानः उत्तमो यस्मात् सः अनुत्तमः।

avidyamānaḥ uttamo yasmāt saḥ anuttamaḥ |

81. दुराधर्षः *Durādharṣaḥ*

दैत्यादिभिः धर्षयितुं न शक्यत इति दुराधर्षः।

daityādibhiḥ dharṣayituṁ na śakyata iti durādharṣaḥ |

82. **कृतज्ञः** ***Kṛtajñaḥ***

**प्राणिणां पुण्यापुण्यात्मकं कर्म कृतं जानातीति कृतज्ञः।**

prāṇiṇāṁ puṇyāpuṇyātmakaṁ karma kṛtaṁ jānātīti kṛtajñaḥ |

83. **कृतिः** ***Kṛtiḥ***

**पुरुषप्रयत्नः कृतिः क्रिया वा। सर्वात्मत्वात् तदाधारतया वा लक्ष्यते कृत्येति वा कृतिः।**

puruṣaprayatnaḥ kṛtiḥ kriyā vā | sarvātmatvāt tadādhāratayā vā lakṣyate kṛtyeti vā kṛtiḥ |

84. **आत्मवान्** ***Ātmavān***

**स्वमहिमप्रतिष्ठितत्वात् आत्मवान्।**

svamahimapratiṣṭhitatvāt ātmavān |

**सुरेशः शरणं शर्म विश्वरेताः प्रजाभवः।**

**अहः संवत्सरो व्यालः प्रत्ययः सर्वसर्शनः॥ १० ॥**

**sureśaḥ śaraṇaṁ śarma viśvaretāḥ prajābhavaḥ |**
**ahaḥ saṁvatsaro vyālaḥ pratyayaḥ sarvasarśanaḥ || 10 ||**

85. **सुरेशः** ***Sureśaḥ***

**सुराणां देवानामीशः सुरेशः। सूपपदो वा राधातुः। शोभनदातृणां वा ईशः सुरेशः।**

surāṇāṁ devānāmīśaḥ sureśaḥ | sūpapado vā rādhātuḥ | śobhanadātṝṇāṁ vā īśaḥ sureśaḥ |

86. **शरणम्** ***Śaraṇam***

**आर्तनाम् आर्तिहरणात् शरणम्।**

ārtanām ārtiharaṇāt śaraṇam |

87. **शर्म** ***Śarma***

परमानन्दरूपत्वात् शर्म ।

paramānandarūpatvāt śarma ।

88. **विश्वरेताः** ***Viśvaretāḥ***

विश्वस्य कारणत्वात् विश्वरेताः ।

viśvasya kāraṇatvāt viśvaretāḥ ।

89. **प्रजाभवः** ***Prajābhavaḥ***

सर्वाः प्रजाः यत्सकाशादुद्भवन्ति स प्रजाभवः ।

sarvāḥ prajāḥ yatsakāśādudbhavanti sa prajābhavaḥ ।

90. **अहः** ***Ahaḥ***

प्रकाशरूपत्वात् अहः ।

prakāśarūpatvāt ahaḥ ।

91. **संवत्सरः** ***Saṁvatsaraḥ***

कालात्मना स्थितो विष्णुः संवत्सर इत्युक्तः ।

kālātmanā sthito viṣṇuḥ saṁvatsara ityuktaḥ ।

92. **व्यालः** ***Vyālaḥ***

व्यालवत् दुराधर्ष-गजवद् ग्रहीतुमशक्यत्वात् व्यालः ।

vyālavat durādharṣa-gajavad grahītumaśakyatvāt vyālaḥ ।

**93. प्रत्ययः *Pratyayaḥ***

प्रतीतिः प्रज्ञा प्रत्ययः। प्रज्ञानं ब्रह्म इति श्रुतेः।

pratītiḥ prajñā pratyayaḥ। prajñānaṁ brahma iti śruteḥ ।

94. **सर्वदर्शनः** *sarvadarśanaḥ*

सर्वाणि दर्शनात्मकानि अक्षीणि यस्य सः सर्वदर्शनः। सर्वात्मकत्वात्।

sarvāṇi darśanātmakāni akṣīṇi yasya saḥ sarvadarśanaḥ ।
sarvātmakatvāt ।

**अजः सर्वेश्वरः सिद्धः दिद्धिः सर्वादिरच्युतः।**

**वृषाकपिरमेयात्मा सर्वयोगविनिस्सृतः॥ ११॥**

**ajaḥ sarveśvaraḥ siddhaḥ diddhiḥ sarvādiracyutaḥ ।**
**vṛṣākapirameyātmā sarvayogavinissṛtaḥ ।। 11 ।।**

95. **अजः** *Ajaḥ*

न जायते इति अजः।

na jāyate iti ajaḥ ।

96. **सर्वेश्वरः** *Sarveśvaraḥ*

सर्वेषामीश्वराणामीश्वरः सर्वेश्वरः।

sarveṣāmīśvarāṇāmīśvaraḥ sarveśvaraḥ ।

97. **सिद्धः** *Siddhaḥ*

नित्यनिष्पन्नरूपत्वात् सिद्धः।

nityaniṣpannarūpatvāt siddhaḥ ।

98. **सिद्धिः** ***Siddhiḥ***

सर्ववस्तुषु संविद्रूपत्वात् निरतिशयरूपत्वाद्वा सिद्धिः। स्वर्गादीनां विनाशित्वादफलत्वम्।

sarvavastuṣu saṁvidrūpatvāt niratiśayarūpatvādvā siddhiḥ |
svargādīnāṁ vināśitvādaphalatvam |

99. **सर्वादिः** ***Sarvādiḥ***

सर्वभूतानामादिकारणत्वात् सर्वादिः।

sarvabhūtānāmādikāraṇatvāt sarvādiḥ |

100. **अच्युतः** ***Acyutaḥ***

स्वरूपसामर्थ्यात् न च्युतो न च्यवते न च्यविष्यत इति अच्युतः।

svarūpasāmarthyāt na cyuto na cyavate na cyaviṣyata iti acyutaḥ |

101. **वृषाकपिः** ***Vṛṣākapiḥ***

वर्षणात् सर्वकामानां धर्मो वृषः। कात् तोयात् भूमिम् अपात् इति कपिर्वराहः। वृषरूपत्वात् कपिरूपत्वाच्च वृषाकपिः।

varṣaṇāt sarvakāmānāṁ dharmo vṛṣaḥ | kāt toyāt bhūmim apāt iti kapirvarāhaḥ | vṛṣarūpatvāt kapirūpatvācca vṛṣākapiḥ |

102. **अमेयात्मा** ***Ameyātmā***

इयान् इति मातुं परिच्छेत्तुं न शक्यते आत्मा अस्येति अमेयात्मा।

iyān iti mātuṁ paricchettuṁ na śakyate ātmā asyeti ameyātmā |

**103. सर्वयोगविनिःसृतः** ***Sarvayogaviniḥsṛtaḥ***

सर्वसम्बन्धविनिर्गतः सर्वयोगविनिःसृतः। नानाशास्त्रोक्तयोगाद् अवगतत्वाद्वा।

sarvasambandhavinirgataḥ sarvayogaviniḥsṛtaḥ |
nānāśāstroktayogād avagatatvādvā |

**वसुर्वसुमनाः सत्यः समात्माऽसंमितः समः।**

**अमोघः पुण्डरीकाक्षो वृषकर्मा वृषाकृतिः॥ १२॥**

**vasurvasumanāḥ satyaḥ samātmā'sammitaḥ samaḥ |**
**amodhaḥ puṇḍarīkākṣo vṛṣakarmā vṛṣākṛtiḥ || 12 ||**

104. **वसुः** *Vasuḥ*

वसन्ति सर्वभूतानि अत्र तेषु अयमपि वसतीति वा वसुः। वसूनां पावकश्चास्मि इत्युक्तो वा वसुः।

vasanti sarvabhūtāni atra teṣu ayamapi vasatīti vā vasuḥ | vasūnāṁ pāvakaścāsmi ityukto vā vasuḥ |

105. **वसुमनाः** *Vasumanāḥ*

वसुशब्देन धनवाचिना प्राश्स्त्यं लक्ष्यते। प्रशस्तं मनो यस्य सः वसुमनाः। रागद्वेषादिभिः क्लेशैः मदादिभिः उपक्लेशैश्च यतो न क्लुषितं चित्तं ततस्तन्मनः प्रशास्तम्।

vasuśabdena dhanavācinā prāśstyaṁ lakṣyate | praśastaṁ mano yasya saḥ vasumanāḥ | rāgadveṣādibhiḥ kleśaiḥ madādibhiḥ upakleśaiśca yato na kluṣitaṁ cittaṁ tatastanmanaḥ praśastam |

106. **सत्यः** ***Satyaḥ***

अवितथरूपत्वात् परमात्मा सत्यः। मूर्तामूर्तात्मकत्वाद्वा। सदिति प्राणः तीत्यन्नम् यमिति दिवाकरः तेन प्राणान्नादित्यरूपत्वाद्वा सत्यः। सत्सु साधुत्वाद्वा सत्यः।

avitatharūpatvāt paramātmā satyaḥ | mūrtāmūrtātmakatvādvā | saditi prāṇaḥ tītyannam yamiti divākaraḥ tena prāṇānnādityarūpatvādvā satyaḥ | satsu sādhutvādvā satyaḥ |

107. **समात्मा** ***Samātmā***

सर्वभूतेषु समः - एक आत्मा वा। समः आत्मा - मनो यस्य रागद्वेषादिभिरदूषितः सः समात्मा।

sarvabhūteṣu samaḥ eka ātmā vā | samaḥ ātmā mano yasya rāgadveṣādibhiradūṣitaḥ saḥ samātmā |

108. **असम्मितः** ***Asammitaḥ*** **Or** **सम्मितः** ***Sammitaḥ***

सर्वैरपरिच्छिन्नः अमित इति असम्मितः। सर्वैरपि अर्थजातैः परिच्छन्नः मितः सम्मितः।

sarvairaparicchinnaḥ amita iti asammitaḥ | sarvairapi arthajātaiḥ paricchannaḥ mitaḥ sammitaḥ |

109. **समः** ***Samaḥ***

सर्वकालेषु सर्वविकाररहितत्वात् समः। मया लक्ष्म्या सह वर्तत इति वा समः।

sarvakāleṣu sarvavikārarahitatvāt samaḥ | mayā lakṣmyā saha vartata iti vā samaḥ |

110. **अमोघः** ***Amoghaḥ***

पूजितः स्तुतः संस्मृतो वा सर्वफलं ददाति न वृथा करोतीति अमोघः। अवितथसङ्कल्पाद्वा।

pūjitaḥ stutaḥ saṁsmṛto vā sarvaphalaṁ dadāti na vṛthā karotīti amoghaḥ | avitathasaṅkalpādvā |

111. **पुण्डरीकाक्षः** *Puṇḍarīkākṣaḥ*

हृदयाख्यं पुण्डरीकम् अश्नुते व्याप्नोति तत्र उपलक्षित इति पुण्डरीकाक्षः। पुण्डरीकाकारे उभे अक्षिणी अस्येति वा।

hṛdayākhyaṁ puṇḍarīkam aśnute vyāpnoti tatra upalakṣita iti puṇḍarīkākṣaḥ | puṇḍarīkākāre ubhe akṣiṇī asyeti vā |

112. **वृषकर्मा** *Vṛṣakarmā*

धर्मलक्षणं कर्म अस्येति वृषकर्मा।

dharmalakṣaṇaṁ karma asyeti vṛṣakarmā |

113. **वृषाकृतिः** *Vṛṣākṛtiḥ*

धर्मार्थम् आकृतिः शरीरं यस्य सः वृषाकृतिः।

dharmārtham ākṛtiḥ śarīraṁ yasya saḥ vṛṣākṛtiḥ |

**रुद्रो बहुशिरा बभ्रुर्विश्वयोनिः शुचिश्रवाः।**
**अमृतः शास्वतस्थाणुर्वरारोहो महातपाः॥ १३॥**
**rudro bahuśirā babhrurviśvayoniḥ śuciśravāḥ |**
**amṛtaḥ śāsvatasthāṇurvarāroho mahātapāḥ || 13 ||**

114. **रुद्रः** *Rudraḥ*

संहारकाले प्रजाः संहरन् रोदयतीति रुद्रः। रुदं राति ददातीति वा। रुः दुःखं दुःखकारणं वा द्रावयतीति वा रुद्रः। रोदनात् रावणाद्वापि रुद्र इत्युच्यते।

saṁhārakāle prajāḥ saṁharan rodayatīti rudraḥ | rudaṁ rāti dadātīti vā | ruḥ duḥkhaṁ duḥkhakāraṇaṁ vā drāvayatīti vā rudraḥ | rodanāt rāvaṇādvāpi rudra ityucyate |

115. **बहुशिराः** *Bahuśirāḥ*

बहूनि शिरांसि यस्येति बहुशिराः। सहस्रशीर्षा पुरुषः इति मन्द्रवर्णात्।

bahūni śirāṁsi yasyeti bahuśirāḥ | sahasraśīrṣā puruṣaḥ iti mandravarṇāt |

116. **बभ्रुः** *Babhruḥ*

बिभर्ति लोकानिति बभ्रुः।

bibharti lokāniti babhruḥ |

117. **विश्वयोनिः** *Viśvayoniḥ*

विश्वस्य कारणत्वात् विश्वयोनिः।

viśvasya kāraṇatvāt viśvayoniḥ |

118. **शुचिश्रवाः** *Śuciśravāḥ*

शुचीनि श्रवांसि  नामानि श्रवणीयानि अस्येति शुचिश्रवाः।

śucīni śravāṁsi  nāmāni śravaṇīyāni asyeti śuciśravāḥ |

119. **अमृतः** *Amṛtaḥ*

न विद्यते मृतं मरणम् अस्येति अमृतः। अजरोऽमरः इति श्रुतेः।

na vidyate mṛtaṁ maraṇam asyeti amṛtaḥ | ajaro'maraḥ iti śruteḥ |

120. **शाश्वतस्थाणुः** *Śāśvatasthāṇuḥ*

शाश्वतश्च असौ स्थणुश्चेति शाश्वतस्थणुः।

śāśvataśca asau sthaṇuśceti śāśvatasthaṇuḥ |

121. **वरारोहः** *Varārohaḥ*

**वरमारोहणं यस्मिन्निति वरारोहः। वरः आरोहः  अङ्कः अस्येति वा। आरूढानां पुनरावृत्ति असंभवात्।**

varamārohaṇaṁ yasminniti varārohaḥ | varaḥ ārohaḥ  aṅkaḥ asyeti vā | ārūḍhānāṁ punarāvṛtti asambhavāt |

122. **महातपाः** *Mahātapāḥ*

**महत् सृज्यविषयं तपः ज्ञानमस्येति महातपाः। यस्य ज्ञानमयं तपः इति श्रुतेः। ऐश्वर्यं प्रतापो वा तपो महदस्येति वा महातपाः।**

mahat sṛjyaviṣayaṁ tapaḥ jñānamasyeti mahātapāḥ | yasya jñānamayaṁ tapaḥ iti śruteḥ | aiśvaryaṁ pratāpo vā tapo mahadasyeti vā mahātapāḥ |

**सर्वगः सर्वविद्भानुः विष्वक्सेनो जनार्दनः।**
**वेदो वेदविदव्यङ्गो वेदाङ्गो वेदवित्कविः॥ १४॥**

**sarvagaḥ sarvavidbhānuḥ viṣvakseno janārdanaḥ |**
**vedo vedavidavyaṅgo vedāṅgo vedavitkaviḥ || 14 ||**

123. **सर्वगः** *Sarvagaḥ*

**सर्वत्र गच्छतीति सर्वगः। कारणत्वेन व्याप्तत्वात् सर्वत्र।**

sarvatra gacchatīti sarvagaḥ | kāraṇatvena vyāptatvāt sarvatra |

124. **सर्वविद्भानुः** ***Sarvavidbhānuḥ***

सर्वं वेत्ति विन्दत इति वा सर्ववित्। भातीति भानुः। तमेव भान्तमनुभाति सर्वम् इति श्रुतेः।

सर्वविच्च असौ भानुश्चेति सर्वविद्भानुः।

sarvaṁ vetti vindata iti vā sarvavit | bhātīti bhānuḥ | tameva bhāntamanubhāti sarvam iti śruteḥ | sarvavicca asau bhānuśceti sarvavidbhānuḥ |

125. **विष्वक्सेनः** ***Viṣvaksenaḥ***

विष्वगञ्जति पलायते दैत्य सेना यस्येति विष्वक्सेनः।

viṣvagañjati palāyate daitya senā yasyeti viṣvaksenaḥ |

126. **जनार्दनः** ***Janārdanaḥ***

जनान् दुर्जनान् अर्दयति हिनस्तीति वा जनार्दनः। जनैः पुरुषार्थं अभ्युदयनिश्श्रेयसलक्षणम्

अर्द्यते याच्यत इति जनार्दनः।

janān durjanān ardayati hinastīti vā janārdanaḥ | janaiḥ puruṣārtham abhyudayaniśśreyasalakṣaṇam ardyate yācyata iti janārdanaḥ |

127. **वेदः** ***Vedaḥ***

वेदरूपत्वात् वेदः। वेदयतीति वा वेदः।

vedarūpatvāt vedaḥ | vedayatīti vā vedaḥ |

Footnote:

सर्वे वेदाः सर्वविद्याः सशास्त्राः सर्वे यज्ञाः सर्व इज्याश्च कृष्णः।

विदुः कृष्णं ब्राह्मणास्तत्त्वतो ये तेषां राजन् सर्वयज्ञाः समाप्ताः॥ MB

sarve vedāḥ sarvavidyāḥ saśāstrāḥ sarve yajñāḥ sarva ijyāśca kṛṣṇaḥ |
viduḥ kṛṣṇaṁ brāhmaṇāstattvato ye teṣāṁ rājan sarvayajñāḥ samāptāḥ || MB

128. वेदवित् *Vedavit*

यथावत् वेदं वेदार्थं वेत्तीत्ति वेदवित्।

yathāvat vedaṁ vedārthaṁ vettītti vedavit ।

129. अव्यङ्गः *Avyaṅgaḥ*

अव्यङ्गः ज्ञानादिभिः परिपूर्णः अविकल उच्यते। व्यङ्गः व्यक्तिः न विद्यते यस्येति वा।

avyaṅgaḥ jñānādibhiḥ paripūrṇaḥ avikala ucyate । vyaṅgaḥ vyaktiḥ na vidyate yasyeti vā ।

130. वेदाङ्गः *Vedāṅgaḥ*

वेदा अङ्गभूताः यस्य सः वेदाङ्गः।

vedā aṅgabhūtāḥ yasya saḥ vedāṅgaḥ ।

Footnote:

ऋचो यजूंषि सामानि तथैवाथर्वणानि च।

शब्दधरस्यैतत् वपुर्विष्णोर्महात्मनः॥

ṛco yajūṁṣi sāmāni tathaivātharvaṇāni ca ।
śabdadharasyaitat vapurviṣṇormahātmanaḥ ।। Vi. Pu. 1.22.83,85

131. वेदवित् *Vedavit*

वेदान् विन्दते विचारयतीति वेदवित्।

vedān vindate vicārayatīti vedavit ।

132. कविः *Kaviḥ*

कविः क्रान्तदर्शी सर्वदृक्।

kaviḥ krāntadarśī sarvadṛk ।

**लोकध्यक्षः सुराध्यक्षो धर्माध्यक्षः कृताकृतः।**

**चतुरात्मा चतुर्व्यूहश्चतुर्दंष्ट्रश्चतुर्भुजः॥ १५॥**

**lokadhyakṣaḥ surādhyakṣo dharmādhyakṣaḥ kṛtākṛtaḥ |**
**caturātmā caturvyūhaścaturdaṁṣṭraścaturbhujaḥ || 15 ||**

133. **लोकाध्यक्षः** *Lokādhyakṣaḥ*

लोकानध्यक्षयतीति लोकाध्यक्षः। सर्वेषां लोकानां प्राधान्येनोपद्रष्टा।

lookānadhyakṣayatīti lokādhyakṣaḥ | sarveṣāṁ lokānāṁ prādhānyenopadraṣṭā |

134. **सुराध्यक्षः** *Surādhyakṣaḥ*

लोकपालादिसुराणामध्यक्षः सुराध्यक्षः।

lokapālādisurāṇāmadhyakṣaḥ surādhyakṣaḥ |

135. **धर्माध्यक्षः** *Dharmādhyakṣaḥ*

धर्माधर्मौ साक्षाद् ईक्षते तदनुरूपं फलं दातुम् तस्मात् धर्माध्यक्षः।

dharmādharmau sākṣād īkṣate tadanurūpaṁ phalaṁ dātum tasmāt dharmādhyakṣaḥ |

136. **कृताकृतः** *Kṛtākṛtaḥ*

कृतश्च कार्यरूपेण अकृतश्च कारणरूपेणेति कृताकृतः।

kṛtaśca kāryarūpeṇa akṛtaśca kāraṇarūpeṇeti kṛtākṛtaḥ |

137. **चतुरात्मा** *Caturātmā*

चतस्रः आत्मानः यस्य सः चतुरात्मा।

catasraḥ ātmānaḥ yasya saḥ caturātmā |

138. **चतुर्व्यूहः** ***Caturvyūhaḥ***

व्यूह्यात्मानं चतुर्धा वै वासुदेवादिमुर्तिभिः। सृष्ट्यादीन् प्रकरोत्येष विश्रुतात्मा जनार्दनः॥ इति व्यासवचनात् चतुर्व्यूहः।

vyūhyātmānaṁ caturdhā vai vāsudevādimurtibhiḥ | sṛṣṭyādīn prakarootyeṣa viśrutātmā janārdanaḥ || iti vyāsavacanāt caturvyūhaḥ |

139. **चतुर्दंष्ट्रः** ***Caturdaṁṣṭraḥ***

दंष्ट्राः चतुस्रो यस्येति चतुर्दंष्ट्रः नृसिंहविग्रहः।

daṁṣṭrāḥ catursro yasyeti caturdaṁṣṭraḥ nṛsiṁhavigrahaḥ |

140. **चतुर्भुजः** ***Caturbhujaḥ***

चत्वारः भुजा अस्येति चतुर्भुजः।

catvāraḥ bhujā asyeti caturbhujaḥ |

**भ्राजिष्णुर्भोजनं भोक्ता सहिष्णुर्जगदादिजः।**

**अनघो विजयो जेता विश्वयोनिः पुनर्वसुः॥ १६॥**

**bhrājiṣṇurbhojanaṁ bhoktā sahiṣṇurjagadādijaḥ |**
**anagho vijayo jetā viśvayoniḥ punarvasuḥ || 16 ||**

141. **भ्राजिष्णुः** ***Bhrājiṣṇuḥ***

प्रकाशैकरसत्वात् भ्राजिष्णुः।

prakāśaikarasatvāt bhrājiṣṇuḥ |

142. **भोजनम्** ***Bhojanam***

भोज्यरूपतया प्रकृतिर्माया भोगनं इत्युच्यते।

bhojyarūpatayā prakṛtirmāyā bhoganam ityucyate |

143. **भोक्ता** *Bhoktā*

पुरुषरूपेण तां प्रकृतिं भुङ्क्त इति भोक्ता ।

puruṣarūpeṇa tāṁ prakṛtiṁ bhuṅkta iti bhoktā ।

144. **सहिष्णुः** *Sahiṣṇuḥ*

हिरण्याक्षादीन् सहते अभिभवतीति सहिण्णुः ।

hiraṇyākṣādīn sahate abhibhavatīti sahiṇṇuḥ ।

145. **जगदादिजः** *Jagadādijaḥ*

हिरण्यगर्भरूपेण जगदादौ उत्पद्यते स्वयमिति जगदादिजः ।

hiraṇyagarbharūpeṇa jagadādau utpadyate svayamiti jagadādijaḥ ।

146. **अनघः** *Anaghaḥ*

अघं न विद्यते अस्येति अनघः ।

aghaṁ na vidyate asyeti anaghaḥ ।

147. **विजयः** *Vijayaḥ*

विजयते ज्ञानवैराग्य-ऐश्वार्यादिभिः गुणैः विश्वमिति विजयः ।

vijayate jñānavairāgya-aiśvāryādibhiḥ guṇaiḥ viśvamiti vijayaḥ ।

148. **जेता** *Jetā*

यतोऽतिशेते सर्वभूतानि स्वभावतः अतो जेता ।

yato'tiśete sarvabhūtāni svabhāvataḥ ato jetā ।

149. **विश्वयोनिः** ***Viśvayoniḥ***

विश्वं योनिरस्येति विश्वश्च असौ योनिश्चेति वा विश्वयोनिः ।

viśvaṁ yonirasyeti viśvaśca asau yoniśceti vā viśvayoniḥ ǀ

150. **पुनर्वसुः** ***Punarvasuḥ***

पुनः पुनः शरीरेषु वसति क्षेत्रज्ञरूपेणेति पुनर्वसुः ।

punaḥ punaḥ śarīreṣu vasati kṣetrajñarūpeṇeti punarvasuḥ ǀ

**उपेन्द्रो वामनः प्रांशुरमोघः शुचिरूर्जितः ।**

**अतीन्द्रः संग्रहः सर्गो घृतात्मा नियमो यमः ॥ १७ ॥**

upendro vāmanaḥ prāṁśuramoghaḥ śucirūrjitaḥ ǀ
atīndraḥ saṅgrahaḥ sargo ghṛtātmā niyamo yamaḥ ǀǀ 17 ǀǀ

151. **उपेन्द्रः** ***Upendraḥ***

इन्द्रमुपगतो अनुजत्वेनेति उपेन्द्रः । यद्वा उपरि इन्द्रः उपेन्द्रः ।

indramupagato anujatveneti upendraḥ ǀ yadvā upari indraḥ upendraḥ ǀ

152. **वामनः** ***Vāmanaḥ***

बलिं वामनरूपेण याचितवानिति वामनः । सम्भजनीय इति वा ।

baliṁ vāmanarūpeṇa yācitavāniti vāmanaḥ ǀ sambhajanīya iti vā ǀ

153. **प्रांशु** ***Prāṁśu***

स एव जगत्त्रयं क्रममाणः प्रांशुः अभुदिति प्रांशुः ।

sa eva jagattrayaṁ kramamāṇaḥ prāṁśuḥ abhuditi prāṁśuḥ ǀ

154. **अमोघः** *Amoghaḥ*

न मोघं चेष्टितं यस्य सः अमोघः ।

na moghaṁ ceṣṭitaṁ yasya saḥ amoghaḥ ।

155. **शुचिः** *Śuciḥ*

स्मरतां स्तुवतामर्चयतां च पावनत्वात् शुचिः ।

smaratāṁ stuvatāmarcayatāṁ ca pāvanatvāt śuciḥ ।

156. **ऊर्गितः** *Ūrgitaḥ*

बलप्रकर्षशालित्वात् ऊर्गितः ।

balaprakarṣaśālitvāt ūrgitaḥ ।

157. **अतीन्द्रः** *Atīndraḥ*

अतीत्य इन्द्रं स्थितो ज्ञानैश्वर्यादिभिः स्वभावसिद्धैरिति अतीन्द्रः ।

atītya indraṁ sthito jñannaiśvaryādibhiḥ svabhāvasiddhairiti atīndraḥ ।

158. **संग्रहः** *Saṅgrahaḥ*

सर्वेषां संहतौ प्रतिसंहारात् संग्रहः ।

sarveṣāṁ saṁhatau pratisaṁhārāt saṅgrahaḥ ।

159. **सर्गः** *Sargaḥ*

सृज्यरूपत्वात् सर्गहेतुत्वाद् वा सर्गः ।

sṛjyarūpatvāt sargahetutvād vā sargaḥ ।

160. **धृतात्मा** ***Dhṛtātmā***

एकरूपेण जन्मादिरहिततया धृत आत्मा येन सः धृतात्मा ।

ekarūupeṇa janmādirahitatayā dhṛta ātmā yena saḥ dhṛtātmā |

161. **नियमः** ***Niyamaḥ***

स्वेषु स्वेषु अधिकारेषु प्रजा नियमयतीति नियमः ।

sveṣu sveṣu adhikāreṣu prajā niyamayatīti niyamaḥ |

162. **यमः** ***Yamaḥ***

अन्तर्यमयतीति यमः ।

antaryamayatīti yamaḥ |

**वेद्यो वैद्यः सदायोगी वीरहा माधवो मधुः ।**

**अतीन्द्रियो महामायो महोत्साहो महाबलः ॥ १८ ॥**

**vedyo vaidyaḥ sadāyogī vīrahā mādhavo madhuḥ |**
**atīndriyo mahāmāyo mahotsāho mahābalaḥ || 18 ||**

163. **वेद्यः** ***Vedyaḥ***

निश्श्रेयसार्थिभिः वेदनार्हत्वात् वेद्यः ।

niśśreyasārthibhiḥ vedanārhatvāt vedyaḥ |

164. **वैद्यः** ***Vaidyaḥ***

सर्वविद्यानां वेदितृत्वात् वैद्यः ।

sarvavidyānāṁ veditṛtvāt vaidyaḥ |

165. **सदायोगी** *Sadāyogī*

सदा आविर्भूतस्वरूपत्वात् सदायोगी ।

sadā āvirbhūtasvarūpatvāt sadāyogī ।

166. **वीरहा** *Vīrahā*

धर्मत्राणाय असुरवीरान् हन्तीति वीरहा ।

dharmatrāṇāya asuravīrān hantīti vīrahā ।

167. **मधवः** *Madhavaḥ*

माया विद्यायाः पतिः माधवः ॥

māyā vidyāyāḥ patiḥ mādhavaḥ ॥

168. **मधु** *Madhu*

यथा मधु परां प्रीतिम् उत्पादयति अयमपि तथा इति मधु ।

yathā madhu parāṁ prītim utpādayati ayamapi tathā iti madhu ।

169. **अतीन्द्रियः** *Atīndriyaḥ*

शब्दादिरहितत्वात् इन्द्रियाणाम् अविषय इति अतीन्द्रियः ।

śabdādirahitatvāt indriyāṇām aviṣaya iti atīndriyaḥ ।

170. **महामायः** *Mahāmāyaḥ*

मायाविनामपि मायाकारित्वात् महामायः ।

māyāvināmapi māyākāritvāt mahāmāyaḥ ।

171. **महोत्साहः** *Mahotsāhaḥ*

जगदुत्पत्ति-स्थिति-लयार्थम् उद्युक्तत्वात् मत्साहः ।

jagadutpatti-sthiti-layārtham udyuktatvāt maotsāhaḥ |

172. **महाबलः** *Mahābalaḥ*

बलिनामपि बलवत्त्वात् महाबलः ।

balināmapi balavattvāt mahābalaḥ |

**महाबुद्धिर्महावीर्यो महाशक्तिर्महाद्युतिः ।**

**अनिर्देश्यवपुः श्रीमानमेयात्मा महाद्रिधृक् (त्) ॥ १९॥**

**mahābuddhirmahāvīryo mahāśaktirmahādyutiḥ |**
**anirdeśyavapuḥ śrīmānameyātmā mahādridhṛk(t) || 19 ||**

173. **महाबुद्धिः** *Mahābuddhiḥ*

बुद्धिमतामपि बुद्धिमत्त्वात् महाबुद्धिः ।

buddhimatāmapi buddhimattvāt mahābuddhiḥ |

174. **महावीर्यः** *Mahāvīryaḥ*

महत् उत्पत्तिकारणम् मायालक्षणं वीर्यम् अस्येति महावीर्यः ।

mahat utpattikāraṇam māyālakṣaṇaṁ vīryam asyeti mahāvīryaḥ |

175. **महाशक्तिः** *Mahāśaktiḥ*

महती शक्तिः सामर्थ्यमस्येति महाशक्तिः ।

mahatī śaktiḥ sāmarthyamasyeti mahāśaktiḥ |

176. **महाद्युतिः** *Mahādyutiḥ*

महती द्युतिः बाह्याभ्यन्तरा चास्येति महाद्युतिः।

mahatī dyutiḥ bāhyābhyantarā cāsyeti mahādyutiḥ |

177. **अनिर्देश्यवपुः** *Anirdeśyavapuḥ*

'इदं तत्' इति निर्देष्टुं यन्न शक्यते परस्मै स्वसंवेद्यत्वात् तत् अनिर्देश्यं वपुरस्येति अनिर्देश्यवपुः।

'idaṁ tat' iti nirdeṣṭuṁ yanna śakyate parasmai svasaṁvedyatvāt tat anirdeśyaṁ vapurasyeti anirdeśyavapuḥ |

178. **श्रीमान्** *Śrīmān*

ऐश्वर्यलक्षणा समग्रा श्रीः यस्य सः श्रीमान्।

aiśvaryalakṣaṇā samagrā śrīḥ yasya saḥ śrīmān |

179. **अमेयात्मा** *Ameyātmā*

सर्वैः प्राणिभिरमेयः आत्मा बुद्धिर्यस्य सः अमेयात्मा।

sarvaiḥ prāṇibhirameyaḥ ātmā buddhiryasya saḥ ameyātmā |

180. **महाद्रिधृत्** *Mahādridhṛt*

महान्तमद्रिं गिरिं मन्दरं गोवर्धनं वा अमृतमथने गोरक्षणे च धृतवानिति महाद्रिधृत्।

mahāntamadriṁ giriṁ mandaraṁ govardhanaṁ vā amṛtamathane gorakṣaṇe ca dhṛtavāniti mahādridhṛt |

**महेष्वासो महीभर्ता श्रीनिवासः सतां गतिः।**

**अनिरुद्धः सुरानन्दो गोविन्दो गोविदां पतिः॥ २०॥**

**maheṣvāso mahībhartā śrīnivāsaḥ satāṁ gatiḥ |**
**aniruddhaḥ surānando govindo govidāṁ patiḥ || 20 ||**

181. **महेष्वासः** *Maheṣvāsaḥ*

महानिष्वासः इषुक्षेपो यस्य सः महेष्वासः।

mahāniṣvāsaḥ iṣukṣepo yasya saḥ maheṣvāsaḥ |

182. **महीभर्ता** *Mahībhartā*

एकार्णवाप्लुतां देवीं महीं बभारेति महीभर्ता।

ekārṇavāplutāṁ devīṁ mahīṁ babhāreti mahībhartā |

183. **श्रीनिवासः** **Śrīnivāsaḥ**

यस्य वक्षसि अनिपायिनी श्रीर्वसति सः श्रीनिवासः

yasya vakṣasi anipāyinī śrīrvasati saḥ śrīnivāsaḥ |

184. **सतां गतिः** *Satāṁ gatiḥ*

सतां वैदिकानां साधूनां पुरुषार्थ-साधनहेतुः सतां गतिः।

satāṁ vaidikānāṁ sādhūnāṁ puruṣārthasādhanaheetuḥ satāṁ gatiḥ|

185. **अनिरुद्धः** *Aniruddhaḥ*

न केनापि प्रादुर्भावेषु निरुद्ध इति अनिरुद्धः।

na kenāpi prādurbhāveṣu niruddha iti aniruddhaḥ |

186. **सुरानन्दः** *Surānandaḥ*

सुरान् आनन्दयतीति सुरानन्दः ।

surān ānandayatīti surānandaḥ ।

187. **गोविन्दः** *Govindaḥ*

'नष्टां वै धरणीं पूर्वमविन्दं वै गुहागताम् । गोविन्द इति तेनाहं देवैर्वाग्भिरभिष्टुतः ॥' इति मोक्षधर्मवचनात् गोविन्दः ।

'naṣṭāṁ vai dharaṇīṁ pūrvamavindaṁ vai guhāgatām । govinda iti tenāhaṁ devairvāgbhirabhiṣṭutaḥ ।।' iti mokṣadharmavacanāt govindaḥ ।

188. **गोविन्दां पतिः** *Govindāṁ patiḥ*

गां विन्दन्तीति गोविदः । तेषां पतिर्विशेषेणेति गोविन्दां पतिः

gāṁ vindantīti govidaḥ । teṣāṁ patirviśeṣeṇeti govindāṁ patiḥ

**मरीचिर्दमनो हंसः सुपर्णो भुजगोत्तमः ।**

**हिरण्यनाभः सुतपाः पद्मनाभः प्रजापतिः ॥ २१ ॥**

**marīcirdamano haṁsaḥ suparṇo bhujagottamaḥ ।**
**hiraṇyanābhaḥ sutapāḥ padmanābhaḥ prajāpatiḥ ।। 21 ।।**

189. **मरीचिः** *Marīciḥ*

तेजस्विनामपि तेजस्त्वात् मरीचिः ।

tejasvināmapi tejastvāt marīciḥ ।

190. **दमनः** ***Damanaḥ***

स्वाधिकारात् प्रमाद्यतीः प्रजा दमयितुं शीलं यस्य वैवस्वतादिरूपेण इति दमनः।

svādhikārāt pramādyatīḥ prajā damayituṁ śīlaṁ yasya vaivasvatādirūpeṇa iti damanaḥ |

191. **हंसः** ***Haṁsaḥ***

अहं स इति तादात्म्यभावितः संसारभयं हन्तीति हंसः। हन्ति गच्छति सर्वशरीरेषु इति वा।

हंसः शुचिषत् इति मन्त्रवर्णात्।

ahaṁ sa iti tādātmyabhāvitaḥ saṁsārabhayaṁ hantīti haṁsaḥ | hanti gacchati sarvaśarīreṣu iti vā | haṁsaḥ śuciṣat iti mantravarṇāt |

192. **सुपर्णः** ***Suparṇaḥ***

शोभनपर्णत्वात् सुपर्णः।

śobhanaparṇatvāt suparṇaḥ |

193. **भुजगोत्तमः** ***Bhujagottamaḥ***

भुजेन गच्छतामुत्तमो भुजगोत्तमः।

bhujena gacchatāmuttamo bhujagottamaḥ |

194. **हिरण्यनाभः** ***Hiraṇyanābhaḥ***

हिरण्यमिव नाभिः यस्येति।

hiraṇyamiva nābhiḥ yasyeti |

195. **सुतपाः** ***Sutapāḥ***

सु - शोभणं तपस् यस्य सः सुतपाः।

su - śobhaṇaṁ tapas yasya saḥ sutapāḥ |

196. **पद्मनाभः** *Padmanābhaḥ*

**पद्ममिव सुवर्तुला नाभिः अस्येति। हृदयपद्मस्य नाभौ मध्ये प्रकाशमानत्वाद्वा पद्मनाभः।**

padmamiva suvartulā nābhiḥ asyeti | hṛdayapadmasya nābhau madhye prakāśamānatvādvā padmanābhaḥ |

197. **प्रजापतिः** *Prajāpatiḥ*

प्रजानां पतिः पिता प्रजापतिः।

prajānāṁ patiḥ pitā prajāpatiḥ |

**अमृत्युः सर्वदृक् सिंहः सन्धाता सन्धिमान् स्थिरः।**

**अजो दुर्मर्षणः शास्ता विश्रुतात्मा सुरारिहा॥ २२॥**

**amṛtyuḥ sarvadṛk siṁhaḥ sandhātā sandhimān sthiraḥ |**
**ajo durmarṣaṇaḥ śāstā viśrutātmā surārihā || 22 ||**

198. **अमृत्युः** *Amṛtyuḥ*

मृत्युः विनाशः तद्धेतुः वा अस्य न विद्यत इति अमृत्युः॥

mṛtyuḥ vināśaḥ taddhetuḥ vā asya na vidyata iti amṛtyuḥ ||

199. **सर्वदृक्** *Sarvadṛk*

सर्वप्राणिनां कृताकृतं पश्यति स्वाभाविकेन बोधेन इति सर्वदृक्।

sarvaprāṇināṁ kṛtākṛtaṁ paśyati svābhāvikena bodhena iti sarvadṛk |

200. **सिंहः** *Siṁhaḥ*

हिनस्ति स्मरणमात्रेण समस्तपापानीति सिंहः।

hinasti smaraṇamātreṇa samastapāpānīti siṁhaḥ|

201. **सन्धाता** *Sandhātā*

कर्मफलैः पुरुषान् संधत्त इति संधाता ॥

karmaphalaiḥ puruṣān sandhatta iti sandhātā ||

202. **सन्धिमान्** *Sandhimān*

फलभोक्ता च स एव इति संधिमान्।

phalabhoktā ca sa eva iti sandhimān |

203. **स्थिरः** *Sthiraḥ*

सदा एकरूपत्वात् स्थिरः।

sadā ekarūpatvāt sthiraḥ |

204. **अजः** *Ajaḥ*

अजति गच्छतीति अजः।

ajati gacchatīti ajaḥ |

205. **दुर्मर्षणः** *Durmarṣaṇaḥ*

मर्षितुं न शक्यत इति दुर्मर्षणः।

marṣituṁ na śakyata iti durmarṣaṇaḥ |

206. **शास्ता** *Śāstā*

शासनकर्ता शास्ता। श्रुतिस्मृत्यादिभिः सर्वेषामनुशिष्टिं करोतीति शास्ता।

śāsanakartā śāstā | śrutismṛtyādibhiḥ sarveṣāmanuśiṣṭiṁ karotīti śāstā |

207. **विश्रुतात्मा** *Viśrutātmā*

विशेषेण श्रुतः सत्यज्ञानादिलक्षणः आत्मा अतः विश्रुतात्मा ।

viśeṣeṇa śrutaḥ satyajñānādilakhṣaṇaḥ ātmā ataḥ viśrutātmā |

208. **सुरारिहा** *Surārihā*

सुरारीणां निहन्तृत्वात् सुरारिहा ।

surārīṇāṁ nihantṛtvāt surārihā |

**गुरुर्गुरुतमो धाम सत्यः सत्यपराक्रमः ।**

**निमिषोऽनिमिषः स्रग्वी वाचस्पतिरुदारधीः ॥ २३ ॥**

**gururgurutamo dhāma satyaḥ satyaparākramaḥ |**
**nimiṣo'nimiṣaḥ sragvī vācaspatirudāradhīḥ || 23 ||**

209. **गुरुः** *Guruḥ*

समस्तविद्यानाम् उपदेष्टृत्वात् गुरुः ।

samastavidyānām upadeṣṭṛtvāt guruḥ |

210. **गुरुतमः** *Gurutamaḥ*

विरिञ्च्यादीनामपि ब्रह्मविद्या-सम्प्रदायकत्वाद् गुरुर्तमः ।

viriñcyādīnāmapi brahmavidyā-sampradāyakatvād gururtamaḥ |

211. **धाम** *Dhāma*

धाम ज्योतिः । सर्वकामानाम् आस्पदताद्वा धाम

dhāma jyotiḥ| sarvakāmānām āspadatādvā dhāma

212. **सत्यः** *Satyaḥ*

सत्यवचनधर्मरूपत्वात् सत्यः। सत्यस्य सत्यमिति वा।

satyavacanadharmarūpatvāt satyaḥ | satyasya satyamiti vā |

213. **सत्यपराक्रमः** *Satyaparākramaḥ*

सत्यः अवितथः पराक्रमो यस्य सः सत्यपराक्रमः।

satyaḥ avitathaḥ parākramo yasya saḥ satyaparākramaḥ |

214. **निमिषः** *Nimiṣaḥ*

निमीलिते नेत्रे अस्य इति निमिषः।

nimīlite netre asya iti nimiṣaḥ |

215. **अनिमिषः** *Animiṣaḥ*

नित्यप्रबुद्धस्वरूपत्वात् अनिमिषः। मत्स्यरूपतया वा आत्मरूपतया वा अनिमिषः।

nityaprabuddhasvarūpatvāt animiṣaḥ | matsyarūpatayā vā ātmarūpatayā vā animiṣaḥ |

216. **स्रग्वी** *Sragvī*

भूततन्मात्ररूपां वैजयन्त्याख्यां श्रजं नित्यं विभर्तीति स्रग्वी।

bhūtatanmātrarūpāṁ vaijayantyākhyāṁ śrajaṁ nityaṁ vibhartīti sragvī |

217. **वाचस्पतिः उरुदारधीः** *Vācaspatiḥ urudāradhīḥ*

वाचः विद्यायाः पतिः वाचस्पतिः। सर्वार्थविषया धीः बुद्धिः अस्येति उदारधीः।

vācaḥ vidyāyāḥ patiḥ vācaspatiḥ | sarvārthaviṣayā dhīḥ buddhiḥ asyeti udāradhīḥ |

**अग्रणीर्ग्रामणीः श्रीमान् न्यायो नेता समीरणः ।**

**सहस्रमूर्धा विश्वात्मा सहस्राक्षः सहस्रपात् । ॥ २४ ॥**

**agraṇīrgrāmaṇīḥ śrīmān nyāyo netā samīraṇaḥ |**
**sahasramūrdhā viśvātmā sahasrākṣaḥ sahasrapāt | || 24 ||**

218. **अग्रणीः** *Agiraṇīḥ*

अग्रं प्रकृष्टं पदं नयति मुमुक्षून् इति अग्रणीः ।

agraṁ prakṛṣṭaṁ padaṁ nayati mumukṣūn iti agraṇīḥ |

219. **ग्रामणीः** *Grāmaṇīḥ*

भूतग्रामस्य नेतृत्वात् ग्रामणीः ।

bhūtagrāmasya netṛtvāt grāmaṇīḥ |

220. **श्रीमान्** *Śrīmān*

श्रीः कान्तिः स्सर्वातिशयिता अस्येति श्रीमान् ।

śrīḥ kāntiḥ ssarvātiśayitā asyeti śrīmān |

221. **न्यायः** *Nyāyaḥ*

प्रमाणानुग्राहको भेदकारकः तर्कः न्यायः ।

pramāṇānugrāhako bhedakārakaḥ tarkaḥ nyāyaḥ |

222. **नेता** *Netā*

जगद्यन्त्र-निर्वाहकः नेता ।

jagadyantra-nirvāhakaḥ netā |

223. **समीरणः** ***Samīraṇaḥ***

**श्वसनरूपेण भूतानि चेष्टयतीति समीरणः ।**

śvasanarūpeṇa bhūtāni ceṣṭayatīti samīraṇaḥ ।

224. **सहस्रमूर्धा** ***Sahasramūrdhā***

**सहस्राणि मूर्धानः अस्येति सहस्रमूर्धा ।**

sahasrāṇi mūrdhānaḥ asyeti sahasramūrdhā ।

225. **विश्वात्मा** ***Viśvātmā***

**विश्वस्य आत्मा विश्वात्मा ।**

viśvasya ātmā viśvātmā ।

226. **सहस्राक्षः** ***Sahasrākṣaḥ***

**सहस्राणि अक्षीणि यस्य सः सहस्राक्षः ।**

sahasrāṇi akṣīṇi yasya saḥ sahasrākṣaḥ ।

227. **सहस्रपात्** ***Sahasrapāt***

**सहस्राणि पादा अस्येति सहस्रपात् ।**

sahasrāṇi pādā asyeti sahasrapāt ।

**आवर्तनो निवृत्तात्मा संवृतः संप्रमर्दनः ।**

**अहःसंवर्तको वह्निरनिलो धरणीधरः ॥ २५ ॥**

**āvartano nivṛttātmā saṁvṛtaḥ sampramardanaḥ ।**
**ahaḥsaṁvartako vahniranilo dharaṇīdharaḥ ।। 25 ।।**

228. **आवर्तनः** *Āvartanaḥ*

संसारचक्रम् आवर्तयितुं शीलम् अस्येति आवर्तनः।

saṁsāracakram āvartayituṁ śīlam asyeti āvartanaḥ ।

229. **निवृत्तात्मा** *Niivṛttātmā*

संसरबन्धान् निवृत्त आत्मा स्वरूपम् अस्येति निवृत्तात्मा।

saṁsarabandhān nivṛtta ātmā svarūpam asyeti nivṛttātmā ।

230. **संवृतः** *Saṁvṛtaḥ*

आच्छादिकया अविद्यया संवृतत्वात् संवृतः।

ācchādikayā avidyayā saṁvṛtatvāt saṁvṛtaḥ ।

231. **संप्रमर्दनः** *Sampramardanaḥ*

सम्यक् प्रमर्दयति रुद्रकालाद्याभि विभूतिभिरिति सम्प्रमर्दनः।

samyak pramardayati rudrakālādyābhi vibhūtibhiriti sampramardanaḥ ।

232. **अहस्संवर्तकः** *Ahassaṁvartakaḥ*

सम्यगह्नां प्रवर्तनात् सूर्यः अहस्संवर्तकः।

samyagahnāṁ pravartanāt sūryaḥ ahassaṁvartakaḥ ।

233. **वह्निः** *Vahṇiḥ*

वहनात् वह्निः।

vahanāt vahniḥ ।

234. **अनिलः** *Anilaḥ*

अनादित्वाद् अनिलः अनिलः। अनादाता अनिलयो वा अनिलः।

anāditvād anilaḥ anilaḥ | anādātā anilayo vā anilaḥ |

235. **धरणीधरः** *Dharaṇīdharaḥ*

धरणीं धत्ते इति धर्णीधरः।

dharaṇīṁ dhatte iti dharṇīdharaḥ |

**सुप्रसादः प्रसन्नात्मा विश्वधृग्विश्वभुग्विभुः।**

**सत्कर्ता सत्कृतः साधुर्जह्नुर्नारायणो नरः॥ २६॥**

**suprasādaḥ prasannātmā viśvadhṛgviśvabhugvibhuḥ |**
**satkartā satkṛtaḥ sādhurjahnurnārāyaṇo naraḥ || 26 ||**

236. **सुप्रसादः** *Suprasādaḥ*

शोभनः प्रसादो यस्य अपकारवतामपि शिशुपालादीनां मोक्षप्रदातृत्वादिति वा सुप्रसादः।

śobhanaḥ prasādo yasya apakāravatāmapi śiśupālādīnāṁ mokṣapradātṛtvāditi vā suprasādaḥ |

237. **प्रसन्नात्मा** *Prasannātmā*

प्रसन्नः आत्मा स्वरूपं यस्य प्रसन्नात्मा। यद्वा प्रसन्नस्वभावः कारुणिकः इत्यर्थ।

prasannaḥ ātmā svarūpaṁ yasya prasannātmā | yadvā prasannasvabhāvaḥ kāruṇikaḥ ityartha |

238. **विश्वधृक्** *Viśvadhṛk*

विश्वं धृष्णातीति विश्वधृक्।

viśvaṁ dhṛṣṇātīti viśvadhṛk |

239. **विश्वभुक्** *Viśvabhuk*

विश्वं भुङ्क्ते भुनक्ति पालयतीति वा विश्वभूक्।

viśvaṁ bhuṅkte bhunakti pālayatīti vā viśvabhūk ।

240. **विभुः** *Vibhuḥ*

हिरण्यगर्भादिरूपेण विविधं भवतीति विभुः।

hiraṇyagarbhādirūpeṇa vividhaṁ bhavatīti vibhuḥ ।

241. **सत्कर्ता** *Satkartā*

सत्करोति पूजयतीति सत्कर्ता।

satkaroti pūjayatīti satkartā ।

242. **सत्कृतः** *Satkṛtaḥ*

पूजितैरपि पूजितः सत्कृतः।

pūjitairapi pūjitaḥ satkṛtaḥ ।

243. **साधुः** *Sādhuḥ*

न्यायवर्ती सधुः। साधयतीति वा। साध्यभेदानुपादानात् साध्यमात्रसाधको वा साधुः।

nyāyavartī sadhuḥ । sādhayatīti vā । sādhyabhedānupādānāt sādhyamātrasādhako vā sādhuḥ ।

244. **जह्नुः** *Jahnuḥ*

जनान् संहारसमये अपह्नुते अपनयतीति जह्नुः। जहाति अविदुषः भक्तान् नयति परं पदमिति वा।

janān saṁhārasamaye apahnute apanayatīti jahnuḥ । jahāti aviduṣaḥ bhaktān nayati paraṁ padamiti vā ।

245. **नारायणः** *Nārāyaṇaḥ*

न रीयते इति नरः। नरस्य अयनं गेहम् - नरायणः, नरायणः एव नारायणः। नरः आत्मा।

ततो जातानि आकाशादीनि नाराणि कार्याणि, तानि कार्याणि अयते कारणात्मना व्याप्नोति।

अतश्च तानि अयनम् अस्येति नारायणः। नराणां जीवानाम् अयनत्वात् प्रलय इति वा।

na rīyate iti naraḥ | narasya ayanaṁ geham - narāyaṇaḥ, narāyaṇaḥ eva nārāyaṇaḥ| naraḥ ātmā| tato jātāni ākāśādīni nārāṇi kāryāṇi, tāni kāryāṇi ayate kāraṇātmanā vyāpnoti | ataśca tāni ayanam asyeti nārāyaṇaḥ | narāṇāṁ jīvānām ayanatvāt pralaya iti vā |

246. **नरः** *Naraḥ*

'नयतीति नरः प्रोक्तः परमात्मा सनातनः' इति व्यासवचनात्। न रीयते इति नरः।

'nayatīti naraḥ proktaḥ paramātmā sanātanaḥ' iti vyāsavacanāt | na rīyate iti naraḥ |

**असंख्येयोऽप्रमेयात्मा विशिष्टः शिष्टकृच्छुचिः।**

**सिद्धार्थः सिद्धसंकल्पः सिद्धिदः सिद्धिसाधनः॥ २७॥**

**asaṅkhyeyo'prameyātmā viśiṣṭaḥ śiṣṭakṛcchuciḥ |**
**siddhārthaḥ siddhasaṅkalpaḥ siddhidaḥ siddhisādhanaḥ || 27 ||**

247. **असंख्ययः** *Asaṅkhyayaḥ*

यस्मिन् संख्या-नाम-रूप-भेदादिः न विद्यत इति असङ्ख्येयः।

yasmin saṅkhyā-nāma-rūpa-bhedādiḥ na vidyata iti asaṅkhyeyaḥ |

248. **अप्रमेयात्मा** *Aprameyātmā*

अप्रमेयः आत्मा स्वरूपमस्येति अप्रमेयात्मा।

aprameyaḥ ātmā svarūpamasyeti aprameyātmā |

249. **विशिष्टः** ***Viśiṣṭaḥ***

अतिशेते सर्वं अतः विशिष्टः।

atiśete sarvam ataḥ viśiṣṭaḥ ।

250. **शिष्टकृत्** ***Śiṣṭakṛt***

शिष्टं शासनं करोतीति शिष्टकृत्। शिष्टान् करोति पालयतीति वा।

śiṣṭaṁ śāsanaṁ karotīti śiṣṭakṛt । śiṣṭān karoti pālayatīti vā ।

251. **शुचिः** ***Śuciḥ***

अञ्जनं माया तत्कार्यं च तद्रहितो निरञ्जनः शुचिः।

añjanaṁ māyā tatkāryaṁ ca tadrahito nirañjanaḥ śuciḥ ।

252. **सिद्धार्थः** ***Siddhārthaḥ***

सिद्धः निर्वृत्तः अर्थ्यमानोऽस्येति सिद्धार्थः।

siddhaḥ nirvṛttaḥ arthyamāno'syeti siddhārthaḥ ।

253. **सिद्धसंकल्पः** ***Siddhasaṅkalpaḥ***

सिद्धः निष्पन्नः संकपः अस्येति सिद्धसंकल्पः।

siddhaḥ niṣpannaḥ saṅkaopaḥ asyeti siddhasaṅkalpaḥ ।

254. **सिद्धिदः** ***Siddhidaḥ***

सिद्धिं फलं कर्तृभ्यः स्वाधिकारानुरूपतो ददातीति सिद्धिदः।

siddhiṁ phalaṁ kartṛbhyaḥ svādhikārānurūpato dadātīti siddhidaḥ।

255. **सिद्धिसाधनः** *Siddhisādhanaḥ*

सिद्धेः साधकत्वात् सिद्धिसाधनः ।

siddheḥ sādhakatvāt siddhisādhanaḥ |

**वृषाही वृषभो विष्णुः वृषपर्वा वृषोदरः ।**

**वर्धनो वर्धमानश्च विविक्तः श्रुतिसागरः ॥ २८ ॥**

**vṛṣāhī vṛṣabho viṣṇuḥ vṛṣaparvā vṛṣodaraḥ |**
**vardhano vardhamānaśca viviktaḥ śrutisāgaraḥ || 28 ||**

256. **वृषाही** *Vṛṣāhī*

वृषः – धर्मः पुण्यम् तदेवाहः प्रकाशसाधर्म्यात् अस्य अस्तीति वृषाही ।

vṛṣaḥ - dharmaḥ puṇyam, tadevāhaḥ prakāśasādharmyāt, asya astīti vṛṣāhī |

257. **वृषभः** *Vṛṣabhaḥ*

वर्षति एष भक्तेभ्यः कामानिति वृषभः ।

varṣati eṣa bhaktebhyaḥ kāmāniti vṛṣabhaḥ |

258. **विष्णुः** *Viṣṇuḥ* **(2, 657)**

विष्णुः विष्णुर्विक्रमणात् इति व्यासेनोक्तेः ।

viṣṇuḥ viṣṇurvikramaṇāt iti vyāsenokteḥ |

259. **वृषपर्वा** *Vṛṣaparvā*

वृषरूपाणि सोपानपर्वाणि आहुः परंधाम आरुरुक्षोः इत्यतः वृषपर्वा ।

vṛṣarūpāṇi sopānaparvāṇi āhuḥ parandhāma ārurukṣoḥ ityataḥ vṛṣaparvā |

260. **वृषोदरः** ***Vṛṣodaraḥ***

प्रजाः वर्षतीव उदरमस्येति वृषोदरः ।

prajāḥ varṣatīva udaramasyeti vṛṣodaraḥ |

261. **वर्धनः** ***Vardhanaḥ***

वर्धयतीति वर्धनः ।

vardhayatīti vardhanaḥ |

262. **वर्धमानः** ***Vardhamānaḥ***

प्रपञ्चरूपेण वर्धत इति वर्धमानः ।

prapañcarūpeṇa vardhata iti vardhamānaḥ |

263. **विविक्तः** ***Viviktaḥ***

इत्थं वर्धमानोऽपि पृथगेव तिष्ठतीति विविक्तः ।

itthaṁ vardhamāno'pi pṛthageva tiṣṭhatīti viviktaḥ |

264. **श्रुतिसागरः** ***Śrutisāgaraḥ***

श्रुतयः सागरे इव अत्र निधीयन्ते इति श्रुतिसागरः ।

śrutayaḥ sāgare iva atra nidhīyante iti śrutisāgaraḥ |

**सुभुजो दुर्धरो वाग्मी महेन्द्रो वसुदो वसुः ।**

**नैकरूपो बृहद्रूपः शिपिविष्टः प्रकाशनः ॥ २९ ॥**

**subhujo durdharo vāgmī mahendro vasudo vasuh |**
**naikarūpo bṛhdrūpaḥ śipiviṣṭaḥ prakāśanaḥ || 29 ||**

265. **सुभुजः** ***Subhujaḥ***

**शोभनाः भुजाः जगद्रक्षाकराः अस्येति सुभुजः।**

śobhanāḥ bhujāḥ jagadrakṣākarāḥ asyeti subhujaḥ ǀ

266. **दुर्धरः** ***Durdharaḥ* (715)**

**धारयितुं अशक्यानि धारयन् न केनापि धारयितुं शक्यते इति दुर्धरः। दुःखेन ध्यानसमये मुमुक्षुभिः हृदये धार्यते इति वा दुर्धरः।**

dhārayitum aśakyāni dhārayan na kenāpi dhārayituṁ śakyate iti durdharaḥ ǀ duḥkhena dhyānasamaye mumukṣubhiḥ hṛdaye dhāryate iti vā durdharaḥ ǀ

267. **वाग्मी Vāgmī**

**यतः निस्सृता ब्रह्ममयी वाक् तस्मात् वाग्मी।**

yataḥ nissṛtā brahmamayī vāk tasmāt vāgmī ǀ

268. **महेन्द्रः** ***Mahendraḥ***

**महांश्च असौ इन्द्रश्चेति महेन्द्रः ईश्वराणामपीश्वरः।**

mahāṁśca asau indraśceti mahendraḥ īśvarāṇāmapīśvaraḥ ǀ

269. **वसुदः** ***Vasudaḥ***

**वसु – धनं ददातीति वसुदः।**

vasu - dhanaṁ dadātīti vasudaḥ ǀ

270. **वसुः** ***Vasuḥ* (104, 696)**

दीयमानं तद्वसु अपि स एवेति वसुः। आच्छादयति आत्मनः स्वरूपं माययेति वा वसुः।

dīyamānaṁ tadvasu api sa eveti vasuḥ | ācchādayati ātmanaḥ svarūpaṁ māyayeti vā vasuḥ |

271. **नैकरूपः** ***Naikarūpaḥ***

एकं रूपमस्य न विद्यते इति नैकरूपः।

ekaṁ rūpamasya na vidyate iti naikarūpaḥ |

272. **बृहद्रूपः** ***Bṛhadrūpaḥ***

बृहत् महत् (वसुधातलं बिभ्रत् वराहादि) रूपं अस्येति बृहद्रूपः।

bṛhat mahat (vasudhātalaṁ bibhrat varāhādi) rūpam asyeti bṛhadrūpaḥ |

273. **शिपिविष्टः** **Śipiviṣṭaḥ**

शिपयः रश्मयः तेषु निविष्ट इति शिपिविष्टः। शिपिरूपेण विशति।

śipayaḥ raśmayaḥ teṣu niviṣṭa iti śipiviṣṭaḥ | śipirūpeṇa viśati |

274. **प्रकाशनः** ***Prakāśanaḥ***

सर्वेषां प्रकाशनशीलत्वात् प्रकाशनः।

sarveṣāṁ prakāśanaśīlatvāt prakāśanaḥ |

**ओजस्तेजोद्युतिधरः प्रकाशात्मा प्रतापनः ।**

**ऋद्धः स्पष्टाक्षरो मन्त्रश्चन्द्रांशुर्भास्करद्युतिः ॥ ३० ॥**

**ojastejodyutidharaḥ prakāśātmā pratāpanaḥ |**
**ṛddhaḥ spaṣṭākṣaro mantraścandrāṁśurbhāskaradyutiḥ || 30 ||**

275. **ओजस्तेजोद्युतिधरः** *Ojastejodyutidharaḥ*

ओजः प्राणबलम् तेजः शौर्यादयः गुणाः द्युतिः ज्ञानलक्षणां दीप्तिः ताः धारयति इति ओजस्तेजोद्युतिधरः ।

ojaḥ prāṇabalam tejaḥ śauryādayaḥ guṇāḥ dyutiḥ jñānalakṣaṇāṁ dīptiḥ tāḥ dhārayati iti ojastejodyutidharaḥ |

276. **प्रकाशात्मा** *Prakāśātmā*

प्रकाशस्वरूपः आत्मा यस्य सः प्रकाशात्मा ।

prakāśasvarūpaḥ ātmā yasya saḥ prakāśātmā |

277. **प्रतापनः** *Pratāpanaḥ*

सवित्रादिविभूतिभिः विश्वं प्रतापयतीति प्रतापनः

savitrādivibhūtibhiḥ viśvaṁ pratāpayatīti pratāpanaḥ

278. **ऋद्धः** *Ṛddhaḥ* **(351)**

धर्मज्ञानवैराग्यादिभिः उपेतत्वात् ऋद्धः ।

dharmajñānavairāgyādibhiḥ upetatvāt ṛddhaḥ |

279. **स्पष्टाक्षरः** *Spaṣṭākṣaraḥ*

स्पष्टम् उदात्तम् ओंकारलक्षणम् अक्षरम् अक्षरम् अस्येति स्पष्टाक्षरः ।

spaṣṭam udāttam oṅkāralakṣaṇam akṣaram akṣaram asyeti spaṣṭākṣaraḥ |

280. **मन्त्रः** *Mantraḥ*

**ऋग्यजुस्सामलक्षणः मन्त्रः। मन्त्रबोध्यत्वाद्वा मन्त्रः।**

ṛgyajussāmalakṣaṇaḥ mantraḥ | mantrabodhyatvādvā mantraḥ |

281. **चन्द्रांशुः** *Candrāṁśuḥ*

**संसारताप-तिग्मांशुताप-तापितचेतसां चन्द्रांशुरिव आह्लादकत्वात् चन्द्रांशुः।**

saṁsāratāpa tigmāṁśutāpa tāpitacetasāṁ candrāṁśuriva āhlādakatvāt candrāṁśuḥ |

282. **भास्करद्युतिः** *Bhāskaradyutiḥ*

**भास्करदुतिसाधर्म्यात् भास्करद्युतिः।**

bhāskaradutisādharmyāt bhāskaradyutiḥ |

**अमृतांशूद्भवो भानुः शशबिन्दुः सुरेश्वरः।**
**औषधं जगतः सेतुः सत्यधर्मपराक्रमः॥ ३१॥**

**amṛtāṁśūdbhavo bhānuḥ śaśabinduḥ sureśvaraḥ |**
**auṣadhaṁ jagataḥ setuḥ satyadharmaparākramaḥ || 31 ||**

283. **अमृतांशूद्भवः** *Amṛtāṁśūdbhavaḥ*

**(मथ्यमाने पयोनिधौ) अमृतांशोः चन्द्रस्य उद्भवो यस्मात् सः अमृतांशूद्भवः।**

(mathyamāne payonidhau) amṛtāṁśoḥ candrasya udbhavo yasmāt saḥ amṛtāṁśūdbhavaḥ |

284. **भानुः** *Bhānuḥ*

**भाति इति भानुः।**

bhāti iti bhānuḥ |

285. **शशबिन्दुः** ***Śaśabinduḥ***

**शश इव बिन्दुः लाञ्छनम् अस्येति शशबिन्दुः चन्द्रः तद्वत् प्रजाः पुष्णातीति शशविन्दुः ।**

śaśa iva binduḥ lāñchanam asyeti śaśabinduḥ candraḥ tadvat prajāḥ puṣṇātīti śaśavinduḥ |

286. **सुरेश्वरः** ***Sureśvaraḥ***

**सुराणां देवानां शोभनदातॄणां चेश्वरः सुरेश्वरः ।**

surāṇāṁ devānāṁ śobhanadātṝṇāṁ ceśvaraḥ sureśvaraḥ |

287. **औषधम्** ***Auṣadham***

**संसाररोगभेषजत्वात् औषधम् ।**

saṁsārarogabheṣajatvāt auṣadham |

288. **जगतः सेतुः** ***Jagataḥ Setuḥ***

**जगतां समुत्तारणहेतुवात् । असम्भेदकरणाद्वा सेतुवत् वर्णाश्रमादीनां जगतः सेतुः ।**

jagatāṁ samuttāraṇahetuvāt | asambhedakaraṇādvā setuvat varṇāśramāadīnāṁ jagataḥ setuḥ |

289. **सत्यधर्मपराक्रमः** ***satyadharmaparākramaḥ***

**सत्याः अवितथा धर्माः ज्ञानादयो गुणाः पराक्रमश्च यस्य सः सत्यधर्मपराक्रमः ।**

satyāḥ avitathā dharmāḥ jñānādayo guṇāḥ parākramaśca yasya saḥ satyadharmaparākramaḥ |

**भूतभव्यभवन्नाथः पवनः पावनोऽनलः ।**

**कामहा कामकृत् कान्तः कामः कामप्रदः प्रभुः ॥ ३२ ॥**

**bhūtabhavyabhavannāthaḥ pavanaḥ pāvano'nalaḥ |**
**kāmahā kāmakṛt kāntaḥ kāmaḥ kāmapradaḥ prabhuḥ || 32 ||**

**290. भूतभव्यभवन्नाथः** *Bhūta**bhavyabhavannāthaḥ***

**भूतभव्यभवतां भूतग्रामाणां नाथः तैः नाथ्यते याच्यते तानुपतपति तेभ्यः आशास्ते तेषामीष्टे शास्तीति वा भूतभव्यभवन्नथाः।**

bhūtabhavyabhavatāṁ bhūtagrāmāṇāṁ nāthaḥ taiḥ nāthyate yācyate tānupatapati tebhyaḥ āśāste teṣāmīṣṭe śāstīti vā bhūtabhavyabhavannathāḥ ।

291. **पवनः** ***Pavanaḥ* (811)**

**पवते इति पवनः।**

pavate iti pavanaḥ ।

292. **पावनः** ***Pāvanaḥ* (811)**

**पावयतीति पावनः।**

pāvayatīti pāvanaḥ ।

293. **अनलः** ***Analaḥ* (711)**

**अलं पर्याप्तं न विद्यते अस्य इति अनलः। अनान् - प्राणान् आत्मत्वेन लातीति जीवः अनलः। णलतेर्गन्धवाचिनो नञ्पूर्वाद्वा।**

alaṁ paryāptaṁ na vidyate asya iti analaḥ । anān - prāṇān ātmatvena lātīti jīvaḥ analaḥ । ṇalatergandhavācino nañpūrvādvā ।

294. **कामहा** ***Kāmahā***

**कामान् हन्ति (मुमुक्षूणां भक्तानां हिंसकानां च) इति कामहा।**

kāmān hanti (mumukṣūṇāṁ bhaktānāṁ hiṁsakānāṁ ca) iti kāmahā

295. **कामकृत्** ***Kāmakṛt***

सात्त्विकानां कामान् करोतीति कामकृत्। कामस्य - प्रद्युम्नस्य जनकत्वाद्वा।

sāttvikānāṁ kāmān karotīti kāmakṛt | kāmasya - pradyumnasya janakatvādvā |

296, **कान्तः** ***Kāntaḥ* (654)**

अभिरूपतमः कान्तः।

abhirūpatamaḥ kāntaḥ |

297. **कामः** ***Kāmaḥ***

काम्यते पुरुषार्थ-अभिकाङ्क्षिभिरिति कामः।

kāmyate puruṣārtha-abhikāṅkṣibhiriti kāmaḥ |

298. **कामप्रदः** ***Kāmapradaḥ***

(भक्तानां) कामान् प्रकर्षेण ददातीति कामप्रदः।

(bhaktānāṁ) kāmān prakarṣeṇa dadātīti kāmapradaḥ |

299. **प्रभुः** ***Prabhuḥ***

प्रकर्षेण भवतीति प्रभुः।

prakarṣeṇa bhavatīti prabhuḥ |

**युगादिकृद् युगावार्तो नैकमायो महाशनः।**

**अदृश्यो व्यक्तरूपश्च सहस्रजिदनन्तजित्॥ ३३॥**

**yugādikṛd yugāvārto naikamāyo mahāśanaḥ |**
**adṛśyo vyaktarūpaśca sahasrajidanantajit || 33 ||**

300. **युगाधिकृत्** *Yugādhikṛt*

**युगादेः कालभेदस्य कर्तृत्वात् युगादिकृत्। युगानामादिम् आरम्भं करोतीति वा।**

yugādeḥ kālabhedasya kartṛtvāt yugādikṛt | yugānāmādim ārambhaṁ karotīti vā |

301. **युगावर्तः** *Yugāvartaḥ*

**युगानि कृतादीनि आवर्तयति कालत्मनेति युगावर्तः।**

yugāni kṛtādīni āvartayati kālatmaneti yugāvartaḥ |

302. **नैकमायः** *Yaikamāyaḥ*

**एका माया न विद्यते बह्वीर्माया वहतीति नैकमायः।**

ekā māyā na vidyate bahvīrmāyā vahatīti naikamāyaḥ |

303. **महाशनः** *Mahāśanaḥ*

**कल्पान्ते सर्वग्रसनात् महदशनमस्येति महाशनः।**

kalpānte sarvagrasanāt mahadaśanamasyeti mahāśanaḥ |

304. **अदृश्यः** *Adṛśyaḥ*

**सर्वषां बुद्धीन्द्रियाणाम् अगम्यत्वात् अदृश्यः।**

sarvaṣāṁ buddhīndriyāṇām agamyatvāt adṛśyaḥ |

305. **व्यक्तरूपः** *Vyaktarūpaḥ*

**स्वयंप्रकाशमानत्वात् व्यक्तरूपः। स्थूलरूपेण व्यक्तं रूपमस्येति व्यक्तरूपः।**

svayamprakāśamānatvāt vyaktarūpaḥ | sthūlarūpeṇa vyaktaṁ rūpamasyeti vyaktarūpaḥ |

306. **सहस्रजित्** *Sahasrajit*

सहस्राणि असुराणां युद्धे जयतीति सहस्रजित्।

sahasrāṇi asurāṇāṁ yuddhe jayatīti sahasrajit ।

307. **अनन्तजित्** *Anantajit*

सर्वभूतानि युद्धक्रीडादिषु सर्वत्र अचिन्त्यशक्तितया जयतीति अनन्तजित्।

sarvabhūtāni yuddhakrīḍādiṣu sarvatra acintyaśaktitayā jayatīti anantajit ।

**इष्टोऽविशिष्टः शिष्टेष्टः शिखण्डी नहुषो वृषः।**

**क्रोधहा क्रोधकृत् कर्ता विश्वबाहुर्महीधरः॥ ३४॥**

**iṣṭho'viśiṣṭaḥ śiṣṭeṣṭaḥ śikhaṇḍī nahuṣo vṛṣaḥ ।**
**krodhahā krodhakṛt kartā viśvabāhurmahīdharaḥ ।। 34 ।।**

308. **इष्टः** *Iṣṭaḥ*

परमानन्दात्मकत्वेन प्रियः इष्टः। यज्ञेन पूजित इति वा इष्टः।

paramānandātmakatvena priyaḥ iṣṭaḥ । yajñena pūjita iti vā iṣṭaḥ ।

309. **अविशिष्टः** *Aviśiṣṭaḥ*

सर्वेषामन्तर्यामित्वेन अविशिष्टः।

sarveṣāmantaryāmitvena aviśiṣṭaḥ ।

310. **शिष्टेष्टः** *Śiṣṭeṣṭaḥ*

शिष्टानां विदुषां इष्टः शिष्टेष्टः। शिष्टैः इष्टः पूजित इति वा। शिष्टाः इष्टाः अस्येति वा।

śiṣṭānāṁ viduṣām iṣṭaḥ śiṣṭeṣṭaḥ । śiṣṭaiḥ iṣṭaḥ pūjita iti vā । śiṣṭhāḥ iṣṭāḥ asyeti vā ।

311. **शिखण्डी** ***Śikhaṇḍī***

शिखण्डः कलापः अलङ्कारः अस्येति शिखण्डी गोपवेषधरः।

śikhaṇḍaḥ kalāpaḥ alaṅkāraḥ asyeti śikhaṇḍī gopaveṣadharaḥ |

312 . **नहुषः** ***Nahuṣaḥ***

यतो नह्यति भूतानि मायया अतः नहुषः।

yato nahyati bhūtāni māyayā ataḥ nahuṣaḥ |

313. **वृषः** ***Vṛṣaḥ***

कामानां वर्षणात् वृषः धर्मः।

kāmānāṁ varṣaṇāt vṛṣaḥ dharmaḥ |

314. **क्रोधहा** ***Krodhahā***

क्रोधं हन्तीति क्रोधहा।

krodhaṁ hantīti krodhahā |

315. **क्रोधकृत्कर्ता** ***Krodhakṛtkartā***

क्रोधं करोतीति क्रोधकृत्। क्रियत इति कर्म जगत् तस्य कर्ता। क्रोधकृतां दैत्यादीनां कर्ता छेदक इत्येकं वा नाम।

krodhaṁ karotīti krodhakṛt | kriyata iti karma jagat tasya kartā | krodhakṛtāṁ daityādīnāṁ kartā chedaka ityekaṁ vā nāma |

316. **विश्वबाहुः** ***Viśvabāhuḥ***

विश्वेषामालम्बनत्वेन विश्वे बाहवः अस्येति वा विश्वबाहुः।

viśveṣāmālambanatvena viśve bāhavaḥ asyeti vā viśvabāhuḥ |

317. **महीधरः** ***Mahīdharaḥ* (369)**

**महीं – पूजां धरणीं वा धरतीति महीधरः ।**

mahīṁ - pūjāṁ dharaṇīṁ va dharatīti mahīdharaḥ |

**अच्युतः प्रथितः प्राणः प्राणदो वासवानुजः ।**

**अपां निधिरधिष्ठानमप्रमत्तः प्रतिष्ठितः ॥ ३५ ॥**

**acyutaḥ prathitaḥ prāṇaḥ prāṇado vāsavānujaḥ |**
**apāṁ nidhiradhiṣṭhānamapramattaḥ pratiṣṭhitaḥ || 35 ||**

318. **अच्युतः** ***Acyutaḥ*** (100)

षड्भावविकारशून्यत्वात् न च्युतिः अस्य इति अच्युतः ।

ṣaḍbhāvavikāraśūnyatvāt na cyutiḥ asya iti acyutaḥ |

319. **प्रथितः** ***Prathitaḥ***

जगदुत्पत्त्यादिकर्मभिः प्रख्यातः प्रथितः ।

jagadutpattyādikarmabhiḥ prakhyātaḥ prathitaḥ |

320. **प्राणः** ***Prāṇaḥ* (66, 407)**

सूत्रात्मना प्रजाः प्राणयतीति प्राणः ।

sūtrātmanā prajāḥ prāṇayatīti prāṇaḥ |

321. **प्राणदः** ***Prāṇadaḥ* (65, 408, 956)**

(सुराणाम् असुराणां च यथासङ्ख्यं) प्राणं बलं ददातीति प्रणदः ।

(surāṇām asurāṇāṁ ca yathāsaṅkhyaṁ) prāṇaṁ balaṁ dadātīti praṇadaḥ |

322. **वासवानुजः** *Vāsavānujaḥ*

अदित्यां कश्यपात् वासवस्य अनुजो जात इति वासवानुजः।

adityāṁ kaśyapāt vāsavasya anujo jāta iti vāsavānujaḥ |

323. **अपां निधिः** *Apāṁ Nidhiḥ*

आपो यत्र निधीयन्ते सः अपां निधिः।

āpo yatra nidhīyante saḥ apāṁ nidhiḥ |

324. **अधिष्ठानम्** *Adhiṣṭhānam*

अधितिष्ठन्ति भूतानि उपादानकारणत्वेन ब्रह्म इति अधिष्ठानम्।

adhitiṣṭhanti bhūtāni upādānakāraṇatvena brahma iti adhiṣṭhānam |

325. **अप्रमत्तः** *Apramattaḥ*

अधिकारिभ्यः कर्मानुरूपं फलं प्रयच्छन् न प्रमाद्यतीति अप्रमत्तः।

adhikāribhyaḥ karmānurūpaṁ phalaṁ prayacchan na pramādyatīti apramattaḥ |

326. **प्रतिष्ठितः** *Pratiṣṭhitaḥ*

स्वे महिम्नि स्थितः प्रतिष्ठितः।

sve mahimni sthitaḥ pratiṣṭhitaḥ |

**स्कन्दः स्कन्दधरो धुर्यो वरदो वायुवाहनः।**

**वासुदेवो बृहद्भानुरादिदेवः पुरन्दरः॥ ३६॥**

**skandaḥ skandadharo dhuryo varado vāyuvāhanaḥ |**
**vāsudevo bṛhadbhānurādidevaḥ purandaraḥ || 36 ||**

327. **स्कन्दः** ***Skandaḥ***

स्कन्दति अमृतरूपेण स्रवति वायुरूपेण शोषयति वा इति स्कन्दः।

skandati amṛtarūpeṇa sravati vāyurūpeṇa śoṣayati vā iti skandaḥ |

328. **स्कन्दधरः** ***Skandadharaḥ***

स्कन्दं धर्मपथं धारयतीति स्कन्दधरः।

skandaṁ dharmapathaṁ dhārayatīti skandadharaḥ |

329. **धुर्यः** ***Dhuryaḥ***

धुरं वहति समस्तभूतजन्मादिलक्षणमिति धुर्यः।

dhuraṁ vahati samastabhūtajanmādilakṣaṇamiti dhuryaḥ |

330. **वरदः** ***Varadaḥ***

अभिमतान् वरान् ददातीति वरदः। वरं - दक्षिणां ददाति यजमानरूपेणेति वा वरदः।

abhimatān varān dadātīti varadaḥ | varaṁ dakṣiṇāṁ dadāti yajamānarūpeṇeti vā varadaḥ |

331. **वायुवाहनः** ***Vāyuvāhanaḥ* (856)**

वहतः - सप्त आवहादीन् वाहयतीति वायुवाहनः। वायुः वाहनं यस्य इति वायुवाहनः।

vahataḥ sapta āvahādīn vāhayatīti vāyuvāhanaḥ | vāyuḥ vāhanaṁ yasya iti vāyuvāhanaḥ |

332. **वासुदेवः** ***Vāsudevaḥ* (695, 709)**

**वसति – वासयति, आच्छादयति वा सर्वमिति वासुः। दीव्यति – क्रीडति, विजिगीषते, व्यवहरति, द्योतते, स्तूयते, काम्यते, गच्छतीति वा देवः। वासुश्च असौ देवश्च वासुदेवः।**

vasati – vāsayati, ācchādayati vā sarvamiti vāsuḥ | dīvyati krīḍati vijigīṣate vyavaharati dyotate stūyate kāmyate gacchatīti vā devaḥ | vāsuśca asau devaśca vāsudevaḥ |

333. **बृहद्भानुः** ***Bṛhadbhānuḥ***

**'बृहन्तो भानवो यस्य चन्द्रसूर्यातिगामिनः। तैर्विश्वं भासयति यः स बृहद्भानुः उच्यते ॥'**

'bṛhanto bhānavo yasya candrasūryātigāminaḥ | tairviśvaṁ bhāsayati yaḥ sa bṛhadbhānuḥ ucyate ||'

334. **आदिदेवः** ***Ādidevaḥ* (490)**

**आदिः – कारणं स चासौ देवश्चेति आदिदेवः। दानादिगुणवान् वा द्योतनादिगुणवान् वा आदिदेवः।**

ādiḥ - kāraṇaṁ sa cāsau devaśceti ādidevaḥ | dānādiguṇavān vā dyotanādiguṇavān vā ādidevaḥ |

335. **पुरन्दरः** ***Purandaraḥ***

**पुरदारणात् पुरन्दरः।**

puradāraṇāt purandaraḥ |

**अशोकस्तारणस्तारः शूरः शौरिर्जनेश्वरः**
**अनुकूलः शतावर्तः पद्मी पद्मनिभेक्षणः ॥ ३७ ॥**

**aśokastāraṇastāraḥ śūraḥ śaurirjaneśvaraḥ**
**anukūlaḥ śatāvartaḥ padmī padmanibhekṣaṇaḥ || 37 ||**

336. **अशोकः** ***Aśokaḥ***

शोकादि-षडूर्मिवर्जितः अशोकः।

śokādi-ṣaḍūrmivarjitaḥ aśokaḥ |

337. **तारणः** ***Tāraṇaḥ***

संसारसागरात् तारयतीति तारणः।

saṁsārasāgarāt tārayatīti tāraṇaḥ |

338. **तारः** ***Tāraḥ*** **(968)**

गर्भजन्मजरामृत्युलक्षणात् भयात् तारयतीति तारः।

garbhajanmajarāmṛtyulakṣaṇāt bhayāt tārayatīti tāraḥ |

339. **शूरः** ***Śūraḥ***

विक्रमणात् शूरः।

vikramaṇāt śūraḥ |

340. **शौरिः** ***Śauriḥ***

शूरस्य अपत्यं वसुदेवस्य सुतः शौरिः।

śūrasya apatyaṁ vasudevasya sutaḥ śauriḥ |

341. **जनेश्वरः** ***Janeśvaraḥ***

जनानां जन्तूनामीश्वरः जनेश्वरः।

janānāṁ jantūnāmīśvaraḥ janeśvaraḥ |

342. **अनुकूलः** *Anukūlaḥ*

आत्मत्वेन हि सर्वेषाम् अनुकूलः। न हि स्वस्मिन् प्रातिकूल्यं स्वयमाचरति।

ātmatvena hi sarveṣām anukūlaḥ | na hi svasmin prātikūlyaṁ svayamācarati |

343. **शतावर्तः** *Śatāvartaḥ*

धर्मत्राणाय शतमावर्तनानि प्रदुर्भावा अस्येति शतावर्तः। नाडीशते प्राणरूपेण वर्तते इति वा।

dharmatrāṇāya śatamāvartanāni pradurbhāvā asyeti śatāvartaḥ | nāḍīśate prāṇarūpeṇa vartate iti vā |

344. **पद्मी** *Padmī*

पद्मं हस्ते विद्यते इति पद्मी।

padmaṁ haste vidyate iti padmī |

345. **पद्मनिभेक्षणः** *Padmanibhekṣaṇaḥ*

पद्निभे ईक्षणे दृशौ अस्येति पद्मनिभेक्षणः।

padnibhe īkṣaṇe dṛśau asyeti padmanibhekṣaṇaḥ |

**पद्मनाभोऽरविन्दाक्षः पद्मगर्भः शरीरभृत्।**
**महर्द्धिर् ऋद्धो वृद्धात्मा महाक्षो गरुडध्वजः॥ ३८॥**

**padmanābho'ravindākṣaḥ padmagarbhaḥ śarīrabhṛt |**
**maharddhir ṛddho vṛddhātmā mahākṣo garuḍadhvajaḥ || 38||**

346. **पद्मनाभः** *Padmanābhaḥ*

पद्मस्य नाभौ मध्ये कर्णिकायां स्थित इति पद्मनाभः।

padmasya nābhau madhye karṇikāyāṁ sthita iti padmanābhaḥ |

347. **अरविन्दाक्षः** *Aravindākṣaḥ*

अरविन्दसदृशे अक्षिणी अस्येति अरविन्दाक्षः।

aravindasadṛśe akṣiṇī asyeti aravindākṣaḥ ।

348. **पद्मगर्भः** *Padmagarbhaḥ*

पद्मस्य हृदयाख्यस्य गर्भे मध्ये अपास्यत्वात् पद्मगर्भः।

padmasya hṛdayākhyasya garbhe madhye apāsyatvāt padmagarbhaḥ ।

349. **शरीरभृत्** *Śarīrabhṛt*

पोषयन् अन्नरूपेण प्राणरूपेण वा शरीरिणां शरीराणि धारयतीति शरीरभृत्। स्वमायया शरीराणि बिभर्तीति शरीरभृत्।

poṣayan annarūpeṇa prāṇarūpeṇa vā śarīriṇāṁ śarīrāṇi dhārayatīti śarīrabhṛt । svamāyayā śarīrāṇi bibhartīti śarīrabhṛt ।

350. **महर्द्धिः** *Maharddhiḥ*

महती ऋद्धिः - विभूतिरस्येति महर्द्धिः।

mahatī ṛddhiḥ vibhūtirasyeti maharddhiḥ ।

351. **ऋद्धः** *Ṛddhaḥ*

प्रपञ्चरूपेण वर्धमानत्वात् ऋद्धः। http://www.software995.com/

prapañcarūpeṇa vardhamānatvāt ṛddhaḥ ।

352. **वृद्धात्मा** *Vṛddhātmā*

वृद्धः आत्मा - स्वरूपः यस्येति वृद्धात्मा।

vṛddhaḥ ātmā svarūpaḥ yasyeti vṛddhātmā ।

353. **महाक्षः** *Mahākṣaḥ*

महती अक्षिणी महान्त्यक्षाणि वा अस्येति महाक्षः ।

mahatī akṣiṇī mahāntyakṣāṇi vā asyeti mahākṣaḥ |

354. **गरुडध्वजः** *Garuḍadhvajaḥ*

गरुडाङ्को ध्वजो यस्येति गरुडध्वजः ।

garuḍāṅko dhvajo yasyeti garuḍadhvajaḥ |

**अतुलः शरभो भीमः समयज्ञो हविर्हरिः ।**

**सर्वलक्षणलक्षण्यो लक्ष्मीवान् समितिञ्जयः ॥ ३९ ॥**

**atulaḥ śarabho bhīmaḥ samayajño havirhariḥ |**
**sarvalakṣaṇalakṣaṇyo lakṣmīvān samitiñjayaḥ || 39 ||**

355. **अतुलः** *Atulaḥ*

तुला अपमानं अस्य न विद्यते इत् अतुलः ।

tulāa apamānam asya na vidyate it atulaḥ |

356. **शरभः** *Śarabhaḥ*

शराः शरीराणि शीर्यमाणत्वात् तेषु प्रत्यगात्मतया भातीति शरभः ।

śarāḥ śarīrāṇi śīryamāṇatvāt teṣu pratyagātmatayā bhātīti śarabhaḥ |

357. **भीमः** ***Bhīmaḥ* or अभीमः** *Abhīmaḥ*

बिभेति अस्मात् सर्वमिति भीमः । समार्गवर्तिनाम् अभीम इति वा ।

bibheti asmāt sarvamiti bhīmaḥ | samārgavartinām abhīma iti vā |

358. **समयज्ञः** *Samayajñaḥ*

(सृष्टि-स्थिति-संहार) समयवित्,षड्समयान् जानातीति वा समयज्ञः। सर्वभूतेषु समत्वं यजनं साधु अस्येति वा समयज्ञः।

(sṛṣṭi-sthiti-saṁhāra) samayavit, ṣaḍsamayān jānātīti vā samayajñaḥ | sarvabhūteṣu samatvaṁ yajanaṁ sādhu asyeti vā samayajñaḥ |

359. **हविर्हरिः** *Havirhariḥ*

यज्ञषु हविर्भागं हरतीति हविर्हरिः। अथवा हूयते हविषा स एवेति हविः। स्मृतिमात्रेण पुंसां पापं, अविद्यातत्कार्यं संसारं वा हरतीति, यज्ञभागं हरतीति वा, हरितवर्णत्वाद् वा हरिः।

yajñaṣu havirbhāgaṁ haratīti havirhariḥ | athavā hūyate haviṣā sa eveti haviḥ | smṛtimātreṇa puṁsāṁ pāpam, avidyātatkāryaṁ saṁsāraṁ vā haratīti, yajñabhāgaṁ haratīti vā, haritavarṇatvād vā hariḥ |

360. **सर्वलक्षणलक्षण्यः** *Sarvalakṣaṇalakṣaṇyaḥ*

सर्वैर्लक्षणैः - प्रमाणैः लक्षणं - ज्ञानं जायते यत्तद् विनिर्दिष्टं सर्वलक्षणलक्षणम् तत्र साधुः सर्वलक्षणलक्षण्यः। तस्यैव परमार्थत्वात्।

sarvairlakṣaṇaiḥ - pramāṇaiḥ lakṣaṇaṁ - jñānaṁ jāyate yattad vinirdiṣṭaṁ sarvalakṣaṇalakṣaṇam tatra sādhuḥ sarvalakṣaṇalakṣaṇyaḥ | tasyaiva paramārthatvāt |

361. **लक्ष्मीवान्** *Lakṣmīvān*

लक्ष्मीः अस्य वक्षसि नित्यं वसतीति लक्ष्मीवान्।

lakṣmīḥ asya vakṣasi nityaṁ vasatīti lakṣmīvān |

362. **समितिञ्जयः** *Samitiñjayaḥ*

समितिं युद्धं जयतीति समितिञ्जयः ।

samitiṁ yuddhaṁ jayatīti samitiñjayaḥ ।

**विक्षरो रोहितो मार्गो हेतुर्दामोदरः सहः ।**

**महीधरो महाभागो वेगवानमिताशनः ॥ ४० ॥**

**vikṣaro rohito mārgo heturdāmodaraḥ sahaḥ ।**
**mahīdharo mahābhāgo vegavānamitāśanaḥ ।। 40 ।।**

363. **विक्षरः** *Vikṣaraḥ*

विगतः क्षरः नाशो यस्यासौ विक्षरः ।

vigataḥ kṣaraḥ nāśo yasyāsau vikṣaraḥ ।

364. **रोहितः** *Rohitaḥ*

स्वच्छन्दतया रोहितां मूर्तिं मत्स्यमूर्तिं वा वहन् रोहितः ।

svacchandatayā rohitāṁ mūrtiṁ matsyamūrtiṁ vā vahan rohitaḥ ।

365. **मार्गः** *Mārgaḥ*

मुमुक्षवः तं देवं मार्गयन्तीति मार्गः । परमानन्दो येन प्राप्यते स मार्ग इति वा ।

mumukṣavaḥ taṁ devaṁ mārgayantīti mārgaḥ । paramānando yena prāpyate sa mārga iti vā ।

366. **हेतुः** *Hetuḥ*

उपादानं निमित्तं च कारणं स एवेति हेतुः ।

upādānaṁ nimittaṁ ca kāraṇaṁ sa eveti hetuḥ ।